७ द्वैषद्धतपुत्रवृन्दारस्वस्राजभस्त्राधुत्य क्योर्वा। दादेर्धुत्यवर्जयोः कयोस्त्राकार इकारः स्त्राद्वा कापि।

दिके दके चटकिका चटका आर्य्यिका आर्य्यका। धुत्ययोस्तु नायिका क्षत्रिका।

८ वाच्चापोऽनुक्तपुंस्कस्य। आपः स्थाने जातोऽकार इदाच स्त्राद्वा कापि नतूक्तपुंस्कस्य।

गङ्गिका गङ्गाका गङ्गका। उक्तपुंस्कस्य तु मुष्किका।

९ ष्ट्रिन्त्रञ्चाहनदादेरीप्। षकारेतष्टकारेत उकारेत ऋकारेतो नान्ताद्दन्तादन्वो वाहो नदादेश्च ईप् स्यात् स्त्रियां।

१० ययोर्लोपोऽयुक्तौपौ। इवर्णावर्णयोर्लोपः स्त्राद्यावक्तौ पौ परे।

।ष। वैष्णवी वराकी।

११ क्यङ्यचौचानात्यपत्यष्णस्य। अपत्यार्थष्णस्य लोपः स्त्राद्यावक्तौ पौ परे क्यङ्यचौ च नलाकारे।

गार्गी।

१२ स्वर्यागस्त्यस्य तिष्यपुष्यस्य ष्ण्यमत्यस्ये येपोर्भष्ण ईपियः। एषां यस्य लोपः स्वादीये पोः परयोर्नचचष्णे ईपि च।

वैरी आगस्ती चातुरी। ट। चयी भूषणी। ड। विदुषी श्रीमती भवती। १६८ अण्यनो नित्यं। ढ। पचन्ती दीव्यन्ती।

१६८ आदीपोः। तुदन्ती तुदती भान्ती भाती। ण। दण्डिनी अर्वती राज्ञी मुनी मघोनी मघवती। ढ। कर्त्री क्रोष्ट्री। अन्च् प्रतीची प्रत्यञ्ची तिरश्ची तिर्यञ्ची अमुमुदीची अदमुदीची उदीची। वाह्। भारौही धेनौही श्वेतवाही प्राच्यूही। नदी मती गौरी।

१३ णचखसादनोरङीव्वातुचे। णादचं खसाच विहितादन ईप् स्यात् वनो रङ च स्त्रियां चे तु वा।

अवावरी धीवरी हरिद्रुस्त्री वङ्कधीवरी वङ्कधी वा।

१४ स्वस्रोधःसंख्यादिदामवयोर्थहायना ङ्गे।

पीनोश्री द्विदाम्नी द्विहायनी।

१५ जातेरतोऽस्त्रीयुङ्सत्काण्डप्राक्प्रान्त शतैकादिपष्यसम्भक्षाजिनैकशणपिण्डा दि

फल्गनादिमूलात्। जातिवाचिनो ऽकारान्तात् स्त्रियामीप् स्यात् नतु स्त्रीयुङादेः।

मृगी हंसी शीतपाकी।

स्त्रीयुङादेस्तु मचिका वैश्या सत्पुष्पा संफला अमूला। जातेः किं मन्दा।

आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह।

गार्गी कठी कौथुमी।

१६ गुणादेतोऽखरुस्रोङः। गुणवाचकादुकारान्तात् स्त्रियामीप् स्यादा नतु खरोः स्रोङश्च।

मृदी मृदुः।

खरस्रोङस्तु खरः पाण्डुः। गुणात् किं

सत्त्वे निविशते ऽपैति पृथग्जातिषु दृश्यते।
आधेयशक्तियोगञ्च सो ऽसत्त्वप्रकृतिर्गुणः।

धेनुः।

१७ पाच्छोणादिस्वाङ्गेतोऽक्नोर्व्वा। पादः शोणादेः स्वाङ्गादिकारान्ताच्च स्त्रियामीप् स्यादा न तु क्नोः।

त्रिपदी त्रिपात् श्रोणी श्रोणा चण्डी चण्डा बिम्बोष्ठी बिम्बोष्ठा। स्वाङ्गात् किं।

स्वाङ्गं स्यादद्रवं मूर्त्तं प्राणिस्थमविकारजं।
दृष्टं तच्चातत्स्थमपि तदन्तादृग्भि च स्थितं।

बक्रखेदाद्रवत्वात्। सुश्रोणा अमूर्त्तत्वात्।

सुमुखा शाला अप्राणिस्थितत्वात्। सुग्रीवा विकारज त्वात्। सुकेशी सुकेशा रथा अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्। सुस्तनी सुस्तना प्रतिमा प्राणिस्थवत् प्राणि यङ्गे स्थितत्वात्।

राजी राजिः। क्रेस्तु बुद्धिः मतिः।

१८ धात्क्रीतात्। धनेन क्रीयते स्म धन क्रीती।

१९ क्तादल्पे। धादित्येव। अभ्रलिप्ती। अभ्रेण लिप्यते स्म।

२० स्वाङ्गाङ्गे। स्वाङ्गात्परो ङे स्थितो यः क्तस्त स्वादीप् स्यात्।

अङ्गभिन्नी।

२१ वाच्छन्नाज्ञातेः। आच्छादन जातिव र्जाज्ञातिवाचिनः परादङ्गे स्थितात् क्तादीप् स्याद्वा।

दत्तभक्षिणी दत्तभक्षिता। छन्नात्तु वस्त्रच्छन्ना।

२२ पत्न्यामपालकान्तात्। पुंवाचकादपाल कान्तादीप् स्याद्भार्य्यायां।

गोपी। पालकान्तात्तु गोपालिका।

२३ ब्रह्मरुद्रभवसर्व्वमृडेन्द्रवरुणादान ङ्च। एभ्यः पत्न्यामीप् स्यात्तेषामानङ् च।

ब्रह्माणी रुद्राणी।

२४ मातुलोपाध्यायक्षत्रियाचार्य्यस्त्र्यार्य्या वा। मातुलानी मातुली। अन्ये लोपमपि विकल्प यन्ति। तदा मातुलेत्यादि। तदाऽन्ङो व्यवस्थाप्यः। आचार्य्यानीत्यत्र न ङलं।

२५ वृषाकप्यग्निमनुपूतक्रतुकुसितकुसी दाद्यैङ्च। एभ्यः पत्न्यामीप्स्यान्नेषामैङ्च। वृषाकपायी अग्नायी मनावी।

२६ नारी सखी यवानी यवनानी हिमान्य रण्यानी मनावी पतिवत्यन्तर्व्वत्नी पत्नी भाजी गोणी नागी स्वली कुण्डी काली कुशी कामुकी घटी कवरी नील्यश्विन्याः। एते निपात्यन्ते।

२७ पङ्क्ती शक्ती युवत्यनड्वाही श्वेन्येनी हरिणी भरिणी रोहिणी लोहिन्यसिक्नी पलि क्न्योर्वा।

पचे। पङ्क्तिः शक्तिः यूनी अनड्वही श्वेता एता हरि ता भरिता रोहिता लोहिता असिता पलितेति। असिक्नी अवृद्धा पलिक्नी वृद्धा।

२८ नमन्संख्यास्वस्रजादेः। एभ्यङ्ङीप् न स्यात्।

सीमा पञ्च स्वसा माता अजा बाला।

२९ नेपीत्युक्तेः। यावती वक्री।

२९ उतोऽयुङरज्ज्वादेर्वप्राणिजातेरूप्।

स्त्रियामुकारान्नाभृजातेरप्राणिजातेश्च ऊप् स्यात् ननु युङो रज्ज्वादेश्च।

कुहूः कर्कन्धूः। प्राणिजातेस्तु धेनुः। युङ्रज्ज्वादेस्तु अभ्यर्युः रज्जुः हनुः।

३० वामलक्ष्मणशफसक्थसक्थितसंधितोपमानादूरोः।

वामोरूः रमोरूः।

३१ तन्वादेर्वा।

तनूः तनुः चमूः चमुः।

इति स्त्रीत्यपादः।

षट्कारकं।

१ स्यर्थसम्बुद्ध्युक्तार्थेप्री। सेरर्थे सम्बोधने त्वौदुक्तार्थे के सति च प्री स्यात्।

कृष्णः श्रीः ज्ञानं हे विष्णो।
अर्च्योऽर्च्यो जीवनः पाता दानीयः प्रभवो खयः।

२ कर्मक्रियाविशेषणाभिनिविशाधिशीङ स्थासव्यधुपावसडंढंदी। कार्यं क्रियाविशेषश्च मभिनिविशादेर्ङश्च ढसंज्ञं स्यात् तच्च षढी।

रामं नमति रामन्दं धर्मान्नभिनिविश्य सन्।
श्रीशेऽधिशेते ऽहिमधिष्ठितो ऽध्यिमध्यास्य घोषं मधुरामनूप्य। यो द्वारकामध्युषितो विकुण्ठमुपावसच्चावसतात् स ढस्थः।

३ देशाध्वकालभावंवाढैः। अढैर्धुभिर्योगे एते ढसंज्ञा वा स्युः।

नदीर्ष्वनेषु चोविन्ना क्रोशान्नेष्यहर्निशि। चंक्रमिला प्रियानीतिं रामो रक्षोवधे स्थितः।

४ सदाध्वादिव्याप्तौ सर्वैःसिद्धे तुधं। सर्वैर्धुभिर्योगे ऽत्यन्तसंयोगे ऽध्वादयो नित्यं ढसंज्ञाः स्युः अर्थसिद्धौ तु धसंज्ञाः।

भृत्यैः क्षणेऽन्वितः क्रोशं मासेा गुरुगृहे स्थितः।
गुरूपदेशं निभृतेा माभ्यामध्येष्ट वाङ्मयं।

५ घोऽनौञेःशब्दाशनगतिस्नार्थादग्रहदश्र
श्रोरखादनीक्रन्दायशब्दायह्वादाह्वत घव
ह्वाहिंसाभक्षोहक्षुमाभिवादिदृशस्तुवा। अ
ञ्यन्तानां शब्दार्थादीनां यो घः स ञ्यन्तानां ढं
स्यात् नतु खादादेः ह्वादेस्तु वा।

गेयमध्यापयद्गोपान् याज्ञिकान्नमभोजयत्। स्वधा
मागमयच्छ्वन् भक्तांस्तत्त्वमबोधयत्। धर्ममस्थाप
यद्विष्णुर्वेदानग्राहयदिधिं। दैत्यानदर्शयच्छक्तिं वे
णुमश्रावयच्च गाः।

खादादेस्तु।

रक्षांस्यखादयदनाययदूर्ध्वलोकमाक्रन्दयत् कपि
भिरायययदाजु रामः। शब्दाययन्विपुमजूहवदाद्
यच्च शैलानवाहयदभक्षयदिष्टभक्षं।

सारथिघहिंसार्थयोस्तु।

वाहानवाहयत् पार्थमरींश्चाभक्षयद्धरिः। शैलान
हारयत् कीशानृक्षैर्वृक्षानजीहरत्। कपीनकारयत्
सेतुं वानरैरपि राघवः। स्माभिवादयते वृद्धान् जा
नकीं लक्ष्मणेन च।

सीतां रामेण चात्मानमदर्शयत लक्ष्मणः।

६ याञ्चार्थदृच्छिप्रच्छरुधद्रुभास्जिनीवह।
हृदण्डिग्रहक्षषमन्थमुष्पचाद्याधवोदिढाः

तमर्थये ऽहं मोक्षं यो गोपैर्दुग्धमदुग्ध गाः। फला न्यवाचिनोदृक्षान् वार्त्ताः पप्रच्छ वल्लवान्। रुरोध गोकुलं गोपीरब्रवीच्च मनोहरं। गोपालानन्वधा त्केलींस्तचाजय्यं जिगाय तान्। वृन्दावनमनैषीद्गास च्छिशूनवहद्व्रजं।

जघारारिष्टमाभीरीर्दैत्यान् प्राणानदण्डयत्। जग्राह यज्ञनो भोज्यमकर्षत् पूतनां बलं। ममन्था मृतमश्नोधिं मुमोष दितिजांश्च तत्। योऽसौ पचति लोकानां पुण्यपापं सुखासुखं।

७ धिक्समयानिकषाहान्तरान्तरेणैना तियेनतेनाभ्युभयपरिसर्व्वतोविनर्त्तै ऽभिप रिप्रत्यनूपह्युपर्य्यधोऽधिभिः। एभिर्योगे द्वी ख्यात्।

वीप्सेत्यभावचिक्षे ऽभिलेषु भागे परिप्रती। अनु लेषु सहार्थे च हीने ऽनूपौ मताविह।

धिग्लोकमीश्वराभक्तं समया माधवं रमा। निक षा गिरिशं गौरी हा लोकं केशवद्विषं। कृष्णो ऽन्तरा ब्रह्मशम्भू नान्तरेणाच्युतं सुखं। दक्षिणेन हरिं रुद्रो गोविन्दमति नेश्वरः। येनेशं हरिरीशस्तं तेनेशमभि तो ऽर्चकाः। रामकृष्णावुभयतो गोपेशं परितः परे। प्रमथाः सर्व्वतः शर्व्वं शर्म्म नेशार्चनं विना। मुक्तिर्न र्त्तै ऽच्युतोपाप्तिं भूतं भूतमभि प्रभुः। भक्तो विभुम भिप्राप्तो गोविन्दमभितिष्ठति। हरिं पर्य्यभवल्लक्ष्मी र्हरं प्रति हलाहलं। विष्णुमन्वर्च्यते भर्गः शक्रादय उपाच्युतं।

लोकानुपर्य्युपर्य्यासे ऽधोधोऽधधि च माधवः।

८ द्विवोधं वा। दिवो धं ढं स्यादा।

अचैरचान् दीव्यतीव्रः।

९ साधनहेतुविशेषणभेदकं धंकर्त्ता धं स्त्री।

नेत्रैःपुण्येन भूषाभिर्भोजा दृष्टः शिवो जनैः।

१० सहवारणसमोनार्थार्थविनापृथङ्ना नाद्यैः। एभिर्योगे ची स्यात्।

सहेशार्थो ऽच्युतो भेदेनासं तेन समोऽस्ति कः। विकारैरहितः प्रभुः सतामर्थः शिवार्चया। श्रीर्ह्रीं त्रेण विना प्रभुः पृथग्विष्णेन तत् पुनः। न नाना प्रभुना रामादर्थेणाधोक्षजोऽवरः।

११ कालेभाड्डेवा। कालवाचिनो नच्चात् ची डे वा स्यात्

रोहिण्यामभवत् कृष्णो रौहिणासीच्च चण्डिका।

१२ मानादीसायां ढे। शतं शतं पचो ऽपीयत् वत्सान् विष्णुः शतेन गाः। द्विद्रोणेन क्रीणाति पञ्चकेन क्रीणाति द्विद्रोणं पञ्चकं।

१३ संज्ञोऽस्मृतौ। स्मरणादन्यस्मिन्नर्थेवर्त्तमानस्य संपूर्व्वस्य जानातेर्ढे ची स्यादा।

संजानीष्व समीत्रा च संजानीहि ततः शिवं।

१४ सन्दानोभेऽधर्म्मेनित्यं। संपूर्व्वदानस्य नन्धिनि अधर्म्मे भे ची स्यात् नित्यं।

संयच्छते स गोप्येष्टं श्रीशः संयच्छति श्रिये।

१५ यस्मैदित्साहृयाक्रोधेर्षारुचिद्रोहस्पृहाघस्पर्द्धिशप्राधीक्षाप्रतिश्रुत्प्रत्यनुगृधार्थ्यर्थाभं ची तादर्थ्ये च। यस्मै दातुमिच्छा श्रद्धया हृयः स्यादेरर्थश्च यस्मै तद्वसंज्ञं स्यात् तच्च ची तादर्थ्ये च।

ददातु सद्मः स सुखं हरिः स्मराद्रोपीगणेऽस्पृयति कुप्यतीर्षति। स्म रोचते द्रुह्यति तिष्ठते स्पृहे ऽस्पाधिष्ट यस्मै स्पृहयत्यन्न च। गर्गो राध्यति रामाय कृष्णाय स्पर्द्धते व्रजे। शुभाशुभं यर्ध्याक्षीक्षयतीत्यर्थः। विभीषणाय शुश्राव राज्यं प्रत्यशृणोद्यमः। प्रतिज्ञातवानित्यर्थः। रामः प्रत्यगृह्णात्तस्मै लक्ष्मणेऽन्वगृह्णात् कपिः। रामं वदन्तं प्रेक्षाहे यामासेत्यर्थः।

सर्व्वो धारयते सर्व्वं सद्मस्थं भज मुक्तये।

१६ शक्तार्थवसड्डितसुखस्वाहास्वधास्वस्तिनमोभिः। एभिर्य्योगे ची स्यात्।

दैत्येभ्यो ऽलं हरिः पूष्णे वषट् सद्मोहितं सुखं। स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नमः सते।

१७ क्तेनाशिषि वा।

सद्मः सतामवा शस्यात्।

१८ परिक्रियोधे वा। भक्तै मुक्तिः परिक्रीता शक्तिर्विष्णोरपारिभिः।

१९ गत्यर्थमन्यढे चेष्टावज्ञेऽनध्वाकाकशू कशृगालनावज्ञे वा। गत्यर्थमन्यत्रार्थे क्रमात् मार्गकाकादिवर्ज्ये चेष्टावज्ञयोस्त्री स्यादा।

व्रजाय व्रजति श्रीशो व्रजं व्रजति केशवः। न त्वा तृणाय मन्ये ऽहं न त्वा मन्ये तृणं खल।

चेष्टावज्ञे किं। मनसा द्वारकामेति त्वां मन्ये ऽहं ज नार्दनं। अध्वादौ तु। गच्छत्यनन्तः पन्थानं न त्वा काकं स मन्यते।

२० यतोऽपायभीजुगुप्सापराजयप्रमादा दानभूत्राणविरामान्तर्द्विवारणं जंपी। यत एति तच्चसंज्ञं स्यात् तच्च पी।

विभीषणः प्रदाद्भ्रष्टो भ्रातुर्भीतो जुगुप्सितः। प्रा पात् पराजितो दुःखादप्रमत्तो विधेः सतः। आत्त विद्यो मुनेर्जातो भ्रातुस्त्रातो निजैर्भवात्। विरतो ऽन्त र्हितो दुष्टाच्छोकाद्रामेण वारितः।

२१ अन्यारभ्यार्यारादृहिर्विनर्त्ते प्रतिप र्य्यपाङ्दिक्शब्दैस्तु यवर्थे च। एभिर्योगे हे तौ यवन्तस्यार्थे च पी स्यात्।

आङ् व्याप्तिसीमाख्यागे ऽन्यौ प्रतिदाननिधौ प्र ति। नेतरो विष्णुरीशानाद्भवात्प्रभृति सो ऽर्च्यते। सो ऽस्मदारादहिस्त्वच्छं विना नार्थो वृषाद्दते। भक्तेः प्रत्यमृतं शश्वोः प्रयुक्तः केशवात् प्रति। पर्य्यनन्तात्त्व त्प्रापा आमृत्योः सेव्यतां हरिः। ब्रह्मास्यासकलात्

पूर्व्वं कल्पाद्यानोऽवरो गदः। आनन्दादीश्वरः प्र लादसमादीयते ऽनेकां। शैलमारुह्य आसने उप विशेत्यर्थः।

२२ वाराद्यैः। दूराद्यिकार्थैः पी स्यादा। समाकृष्य यो दूरं पापाद्दुःखस्य सोऽन्तिकं।

२३ समार्थैर्नार्य्यस्तस्ताद्धितसुखैर्निर्द्धारे स म्बन्धे ढे च षी। एभिर्योगे एषु च षी स्यात्।

यः सर्व्वस्य समो यस्य दक्षिणेनोत्तरा स्थितः। उप र्य्यधः पूर्व्वतश्च प्रत्यक्षमखिलं हितं। सुखञ्च तस्य देवानां वर्य्यस्य पदयोर्भजे।

२४ ज्ञोऽज्ञाने भे।

ब्रह्मोर्मुकुन्दे जानीते भक्त्या जानाति ब्रह्मरं। ब्रह्म ना साधनेन मुकुन्दे प्रकर्षेण इति। प्रकृष्टार्थस्य ज्ञा नातिः।

२५ तृप्तमर्थानाम्वा।

तृप्तारस्य हरितृप्तः पूर्णः ज्ञानेन ब्रह्मरः।

२६ ढचेक्तव्यक्युकञ्क्तवतुक्तवर्थक्तो च्छत्रानवस्त्रीलार्थतृन्भव्यर्णार्थनिनि। ज्ञा दिवर्जे इति प्रयुज्यमाने ढे चे च षी स्यात्।

जगतां कारकः कृष्णः क्षत्रियोरिपोरिदं।

व्यादेतु। ब्रह्मा दधिं मारकमेतदर्थकानुग्नीतव
न्तं यतिभिः सुदर्शनं। ज्ञातं हरिं जिष्णुरघानि सं
स्तवन्मुदं दधानो ऽर्थितमीचिवान्न कः। अन्हाता
हत्कदागामी दाथी मोचमृणं शिवः।

२७ कामुकसङ्घार्थकेन। कामुकशब्देन व
र्त्तमानडोर्व्विहितकेन च योगे ढे घे च षी स्यात्
यो लक्ष्म्याः कामुको ज्ञातः सतां तस्येदमासितं।

२८ ल्यभावकास्त्यणकसढे घे वा। स्त्री भा
वार्थके स्त्रीविहितमं नकञ्च हित्वा अन्यच्च सढे घे च
षी स्यादा।

त्वया मम च कृष्णो ऽर्थः स्वातं स्वच्च यस्य तु।
स्वष्टेः कृतिर्हतिर्येन चिकीर्षा यस्य भेदिका।

२९ स्वामीश्वराधिपतिदायादसाक्षिप्रति
भूप्रभूतकुशलायुक्तनिपुणसाधुसुजर्थैर्नाद्
रे ष्ट्री च।

स्वामी मुकुन्दः सर्व्वेषां साक्षी सर्व्वेष्वधोक्षजः।
निश्चक्रुस्त्विरगुर्गोप्ये ऽप्रत्ये मातूरदत्यजं।

३० कालभावाधारं डं ष्ट्री। एते डसंज्ञाःस्यु
स्त्रय ष्ट्री।

स्वामीप्याश्लेषविषयैर्व्याप्याधारश्चतुर्विधः।
रेमे ब्रह्मदि गोविन्दो गोपीभिरुदिते विधौ।
कालिन्द्यां कानने केलौ कुशलः सकले स्थितः।

२१ अधिकेशार्थोपाधिभ्यां। अधिकार्थेनो पेन स्वाम्यर्थेनाधिना च योगे प्री स्यात्।

गुणा उप परार्द्धे स्युर्विष्णोरधि हरौ सुराः।

२२ ढेनार्थात्। ढेन योगे निमित्तात् प्री स्यात्।

वस्त्रेषु रजकमवधीत् कृष्णः।

२३ क्रौनाढे। क्रादिहितेनेनार्थयोगे ढे प्री स्यात्।

वेदेऽधीती।

२४ निर्धारेऽधिकेनक्रियान्तःकालाध्वनोः पी च।

श्रेष्ठं कपासुव्रकादेरद्वैकाद्यके ऽधिकं।

मूर्धष्टकाच्छिवं ध्यायन् भुञ्जीथा द्युञ्जि वा व्यहात्।

भूक्षो योजनलचे ऽकं पश्येलचदयादिधुं।

२५ सीमान्तर्मार्गात् प्री चान्ते।

सोमनाथाच्छतं क्रोशाः कृष्णः क्रोशेषु चायुते।

गङ्गायमुनयोर्मध्ये कति क्रोशाश्च जाह्नवी।

२६ व्यादयोऽर्थार्थैकत्वोः श्रेस्तुसर्व्वाः।

अर्थार्थैनैकत्वेलेस्वादयः स्युः श्रेस्तु सर्व्वाः।

भुक्त्यर्थेनार्थस्य मुक्तेः किं कार्य्यं नार्च्यते ऽच्युतः।

२७ संज्ञाःकं। ढधघभजडाः कसंज्ञाः स्युः।

इति कपादः।

समासः।

१ दैक्यं सोऽन्वये। द्वयोर्बहूनामा दानामैक्यं वसंज्ञं स्यात्। तच्चान्वये सति कार्य्यं।

यथा वन्द्यौ चरणौ कृष्णस्येत्यर्थे कृष्णचरणौ वन्द्यौ विति स्यात्। नतु कृष्णवन्द्यौ चरणाविति।

२ भिन्नान्यैकार्थद्यादिसंख्याव्यादीनां च ह य वगवाः। भिन्नार्थानां दानां वसंज्ञोऽन्यार्थानां दानां हसंज्ञ एकार्थानां दानां यसंज्ञो द्यादिक्रमान्तपूर्व्वदानां वसंज्ञः संख्यापूर्व्वदानां मसंज्ञो व्यपूर्व्वदानां वसंज्ञः स्यात्।

३ लोर्लुक्त्ये च। से स्थितायाः लोर्लुक् स्यात् त्ये च परे।

द्वन्द्वसमासः।

इतरेतरयोगे च समाहारे च सो द्विधा।

हरिश्च हरश्च तौ हरिहरौ।

ब्रह्मा च अच्युतश्च इन्द्रश्च ते ब्रह्माच्युतेन्द्राः।

४ पुम्वत् श्रेः। ये स्त्रितश्च श्रेः पुम्वत् स्यात् स्त्रे च।

पूर्वपश्चिमे।

५ चतोऽतत्पुत्रेसगोत्रविद्येचे। चे स्त्रि तश्च चदन्तश्च ऊ स्याद्दन्ते पुत्रे च परे सगोत्र विद्ये।

मातापितरौ पितापुत्रौ होतापोतारौ।

६ चगैक्यवं स्त्रीवं। चश्चैकं गश्चैकं चश्च स्त्री वं स्यात्।

७ चैक्याच्चुदषहोऽः। चवर्गात्षाद्यहान्ता चैक्यादः स्यात्।

वाक्च त्वक् च दधोः समाहारः वाक्त्वचं श्रीखं प्रभीदधं वाक्त्विषं पीठच्छत्रोपानहं।

८ उर्व्वष्ठीवं पद्ष्ठीवं धेन्वनडुहौ अहो रात्रः स्त्रीपुंसौ वाङ्मनसे ऋक्सामे दार गवमश्विभ्वादयः साध्याः।

इति चः।

बहुव्रीहिसमासः।

पीतमम्बरं यस्यासौ पीताम्बरो हरिः।

नीलमुज्ज्वलं वपुर्यस्यासौ नीलोज्ज्वलवपुः कृष्णः।

२० पूर्णोऽदान्तेति। हरिभाविणी हरिभाविनी। श्रीभावेण श्रीभावेन। रम्यविधा श्रीकामेण। रम्यप केन रम्ययूना रम्याङ्गा।

९ नञोऽनौवाउञ्झसेः।नञोऽपि परे ऽन् ह से च अः स्यात् से वा।

नास्यन्तो यस्यासौ अनन्तः नान्तः अच्युतः मच्युतः।

१० महत्तैकार्थेजातीयघासकरविशिष्टे तु नीच। महतस्त्र आ स्यात् एकार्थे जातीयादौ तु नी च।

११ पुम्वत्स्युक्तपुंस्कःस्त्रियांच्छमानिन त्वप्रसन्ततरादौ चाहृष्ये। उक्तपुंस्कः स्त्रीलिङ्गः पुम्वत् स्यात् एकार्थे स्त्रीलिङ्गे ऽादौ चनतुरूपे।

१२ नोप्राक्कोङ्पूरण्याख्यायुम्क्तविकारार्थ णित्तंजातिस्त्रङ्गेष्वमानिनि। ऊवन्तं

तस्या ऽकस्य वा केन ककारोऽपूरणीत्वान्नं संज्ञामूत मिमुषन्नार्थविकारार्थवर्जं णित्त्वान्त्व पुम्वन्न स्यात्।

जातिस्वाङ्ग विहितेवन्त्वन्तु मानिनीवर्जे।

१३ पूरणीप्रियामनोज्ञासुभगादुर्भगाचान्ताकान्तावामनावामा चपलावाल्लसम्मस चिवातनयादुहितृस्वाकल्याणीभद्रौ। एषु परेषु पुम्वन्न स्यात्।

१४ मवावादेः स्वोऽन्ते गौण्वेऽमीयसः। अन्ते स्थितस्य गोरप ईप ऊपश्च स्वः स्यात्। अप्रधानत्वे सति नलीयसः।

शीतगुः ध्वस्तमायः कालतनुः ईयस्तु वङ्गप्रेयसी। ऊवादेस्तु वामोरूभार्य्यः। रसिकाभार्य्यः पाचिका भार्य्यः षष्ठीजायः दत्ताजायः मैथिलीभार्य्यः ब्राह्मणीभार्य्यः सुकेशीभार्य्यः। अमानिनिकिं। ब्राह्मणमानिनी। युमादेस्तु वैयाकरणभार्य्यः सौवश्वभार्य्यः काषायकन्थः हैममुद्रिकः। पूरण्यादौ तु।

१५ चेपूरणीप्रमाणाभ्यामः। आभ्यामः स्याद्धे।

१० यचोर्लोपो ऽयुक्तौ यौ। कल्याणीपञ्चमा रात्रयः कल्याणीप्रियः। मुख्याच्च पूरणी ग्राह्या तेन।

१६ द्यूतः कः। दीसंज्ञकाद्दन्ताच्च कः स्याद्धे। कल्याणीपञ्चमीकः पक्षः।

राधिः पूरणी वाच्या चेति पूर्ववच्च मुख्यत्वं। स्त्री प्रमाणः।

१७ सहः सोवा। सहस्य हे सः स्वादा। सह माचा वर्त्तते योऽसौ समातृकः। सहमातृकः।

१८ सक्थ्यक्ष्णः षः स्वाङ्गे। आभ्यां हे षः स्वात् स्वाङ्गे।

दीर्घसक्थः पुष्करीकवदक्षिणी यस्यासौ पुष्करीकाक्षः। स्वाङ्गे तु दीर्घसक्थि प्रकटं।

१९ दारुण्यङ्गुलेः।

पञ्चाङ्गुलं दारु।

२० द्वित्रेर्मूर्द्धः।

२१ न्योर्लोपौतौतेऽच्चे। नस्य लोपःस्यादु वर्णस्य अात् स्यादपि ये च ते।

द्विमूर्द्धः।

२२ संख्याया डोऽवहोः। वऊवर्जायाः संख्या याः डः स्वाङ्गे।

पञ्च षट् परिमाणं येषां ते पञ्चषाः उपगता दश येषां ते उपदशाः वहोस्तु उपवहवः।

२३ नाभेर्नाभ्नि।

पद्मनाभः।

२४ लोम्नोऽन्तर्बहिर्भ्यां।

अन्तर्लोमः बहिर्लोमः।

२५ नञदुः सीः सक्थ्नोवा।

असक्थः असक्थिः।

२६ अस् प्रजायाः।

अप्रजाः सुप्रजाः।

२७ मन्दाल्पाच्चतु मेधायाः।

अमेधाः सुमेधाः मन्दमेधाः।

२८ धर्म्मादन्।

सुधर्म्मा।

२९ नञसुचिव्युपाच्चतुरोऽः। एभ्यश्चतुरोऽःस्याङ्गे।

अचतुरः सुचतुरः।

३० भान्नेतुः। नचचान्नेतृशब्दादः स्याङ्गे।

मृगनेचा रात्रिः।

३१ संख्याह्वपमानात् पात्यादोऽहस्त्यादेः।

एभ्यः पादस्य पात् स्यात् हे नतु हस्त्यादेः।

द्विपात् सुपात् व्याघ्रपात्। हस्त्यादेस्तु हस्ति पादः।

३२ कुम्भादेरीपि। कुम्भादेः परस्य पादस्य पात् स्यात् रे ईपि परे।

१४६ पात् पत् घौ। कुम्भपदी अतपदी। ईपि किं कुम्भपादः।

३३ व्यतीहारेचिः पूर्वोर्घोऽनच्यावा। व्यतीहारे यो हलस्यादिः स्यात् पूर्वस्य च घः स्यादां वा गत्वचि।

केशेषु केशेषु गृहीत्वा यद्युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्य यद्युद्धं प्रवृत्तं दण्डादण्डि मुष्टामुष्टि मुष्टीमुष्टि वा हावाहवि बाहुबाहवि। अचि तु अस्यचि।

इति हः।

कर्म्मधारयसमासः।

परमश्चासावात्मा चेति परमात्मा संज्ञायां। सच्चासावानन्दश्चेति सच्चिदानन्दः।

३४ कोऽादिः पुंवद्यजातीयदेशीयेतत्वे स्वजात्याख्यः। कोऽ पूरणादिः पुंवत् स्यात्। स्त्रादौ तत्त्वयोस्तु जातिसंज्ञावर्जं।

पाचकस्त्री पञ्चमभार्य्या।

३५ द्वित्र्यष्टाधिकादशत्रयोऽष्टास्त्रिदशाद्योऽन्त्यषट्कोत्वनशीतौ वा। एषामेते क्रमात् खुर्ग्रादिचिके चत्वारिंशदादिषट्केऽशीतिवर्जे तु वा।

द्व्यधिकादश द्वादश त्रयोदश अष्टादश द्वाचत्वारिंशत् द्विचत्वारिंशत्। अशीताविति किं द्व्यशीतिः।

३६ वैकोनस्यैकाद्वैकान्नौसंख्यायां। एकाद्वविंशतिः एकान्नविंशतिः एकोनविंशतिः।

३७ सख्यद्वेरात्रः षः षगे च। एभ्यः षः स्यात् ये वे गे च।

प्रियसखः परमाहः महाराजः।

३८ सर्व्वैकदेशसंख्यातसंख्याव्यान्नैकान्नै

घेऽङ्कोऽङ्कः। एभ्यः परस्य अहन् इत्यस्य स्थाने ऽङ्कः स्यात् यादौ नलोपाभ्यां च ऐक्ये।

३९ प्राग्वत्नोणोऽतोऽङ्कस्य। सर्व्वाङ्कः पूर्व्वाङ्कः एकात्तु एकाहः। अत इति किं त्रिभिरहोभिर्जातः त्र्यङ्कः।

४० कौटग्रामात्तक्षणः।

कौटतक्षः।

४१ जातमहद्वृद्धादुक्षणः।

जातोक्षः।

४२ भुवोऽत्यग्राण्ड्वृषभमानात्। अतेः प्राणिन्यर्जादुक्षमानाच्च भुवः षः स्यात् यादौ।

आकर्ष इव वा आकर्षभ्वः।

प्राणिनस्तु व्याघ्र इव वा व्याघ्रवा।

४३ पूर्व्वोत्तरमृगाच्चानतेः सक्थ्नः। एभ्यः पूर्व्वोक्ताच्चातिवर्जात्सक्थ्नः षः स्यात् यादौ।

पूर्व्वसक्थं।

४४ देवाद्ब्रह्मणः कुमहद्ब्रह्मान्तुवा।

कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा।।

४५ सरोनोयोऽमनःसंज्ञाजात्योः। महा मसं उधानसं लोहितायसं मिण्डामः अमृतामः।

४६ सर्व्वैकदेशसंख्यातपुण्यवर्षादीर्घाद्रा त्रेः। रात्रेरेकदेशे वर्त्तमानः पूर्व्वादिरेकदेशः।

पूर्व्वरात्रः अपररात्रः।

४७ गोरतार्थे। गोशब्दात् षः स्यात् यादौ न तु तार्थे।

परमगवः।

४८ नावोऽर्द्धाङ्गेच। अर्द्धात् परानौशब्दात् त्रः स्याद्तार्थे गे च।

अर्द्धनावं।

४९ खार्य्या वा।

अर्द्धखारं अर्द्धखारी।

इति यः।

तत्पुरुषसमासः।

कृष्णमाश्रितः कृष्णाश्रितः।

५० व्यं पूर्वे। परं व्यं पूर्वे स्यात् से सति।

राजानमतिक्रान्ता अतिराजी अतिस्त्री अत्यग्निः अतिस्त्रिः।

५१ संख्याव्याङ्गात्यङ्गुलिभ्यामः। संख्याया व्याच्च पराभ्यां राज्यङ्गुलिभ्यामः स्यात् यादौ नतु तार्थे।

अतिराजः अत्यङ्गुलः। हरिणा त्राता हरित्रातः विष्णवे दत्तं विष्णुदत्तं अच्युताज्ञातं अच्युतजातं कृष्णस्य सखा कृष्णसखः महाधाषः ग्रामतक्षः मृगसक्थं जालसरसं मण्डूकसरसं राजगवः वर्षाराज्ञः।

५२ मुख्यार्थैरसः। मुख्यार्थादुरःप्रभृतेः स्यात् यादौ।

अग्नेरसं मुखोऽस्य इत्यर्थः। पुरुषेषु उत्तमः पुरुषोत्तमः अवन्तिषु ब्रह्मा अवन्तिब्रह्मः।

इति षः।

द्विगुसमासः।

तस्यार्थे विषये वाच्ये अपत्यार्थे ण्यिकादिके।
प्राग्राजादेः समाहारे गम्यिधोत्तरदे परे।
पञ्चभिर्गोभिः क्रीतः पञ्चगुः।

५२ गैक्यादतोऽ पाचादेरीप्। गैक्यादका रात्रादीप् स्यात् न तु पाचादेः।
त्रयाणां लोकानां समाहारः त्रिलोकी। पाचादे स्तु द्विपात्रं त्रिभुवनं चतुर्युगं।

५४ वानापः। अनञादापश्च ङीप् स्यादा।
पञ्चकर्मी पञ्चकर्मं त्रिखट्वी त्रिखट्वं।

५५ तार्यमानात्काण्डात्त्वक्षेत्रे।
व्याढकी त्रिकाण्डी रज्जुः क्षेत्रे तु त्रिकाण्डा भूमिः।

५६ पुरुषादा।
द्विपुरुषी द्विपुरुषा त्रिसखं त्रिगवं त्रिनावं त्रिखारं त्रिखारि व्यहः।

५७ दिक्शेर्व्याञ्जलेरः।
द्व्यञ्जलं द्व्यञ्जलि द्व्यञ्जुलं चिराजं।
पञ्च गावो धनं यस्यासौ पञ्चगवधनः दिनावधनः दिखारधनः द्व्यञ्जलिधनः।

इति गः।

अव्ययीभावसमासः।

वः कसामीप्यसादृश्यसाकल्यानुक्रमर्द्धिषु।
वीप्सापर्य्यन्तयोग्यत्वपश्चाद्यर्थानतिक्रमे।
शब्दप्रादुर्भावाभावयौगपद्येष्वनेकधा।

५८ वात्क्तेर्म्मोऽनोऽप्याः। अकारान्तादव्ययात् परस्याः क्तेर्मः स्यात् न तु प्याः।

कृष्णमधिकृत्य प्रवृत्ता कथा अधिकृष्णं। अप्याः किं कृष्णस्य समीपादुतः उपकृष्णादुतः।

५९ वीप्सोर्व्वा।
उपकृष्णं उपकृष्णेन कार्य्यं उपकृष्णं उपकृष्णे स्थितः।

६० लुक्परात्। अकारान्तादव्ययात् वात् परस्याः क्तेर्लुक् स्यात्।

६१ सहः सोऽक्रान्ते। सहस्य सः स्यात् न तु क्रान्ते।

हरेः सदृशं सहरि। क्रान्ते तु सहपूर्व्वाक्रं। तृणेन सकलमत्ति सतृणं ज्येष्ठमनुक्रम्य अनुज्येष्ठं मद्राणां समृद्धिः सुमद्रं विष्णुं विष्णुं प्रति प्रतिविष्णु। अग्नि यत्पर्य्यन्तमधीते साग्नि रूपस्य योग्यं अनुरूपं अग्नेरस्य यस्मात् अनुग्नेयं शक्तिमनतिक्रम्य यथाशक्ति। हरेः

अन्तः प्रादुर्भूतः इतिहरि पापस्याभावः अपापं। च क्रोण युगपद्वृत्तिः सचक्रं यावन्तः श्लोकास्तावन्तो ऽनुत प्रमाणाः यावत्श्लोकं।

६२ शरदिषडयश्वेतोमनोविदुषानद्विमवदि हिवनसुहिक्चतुर्यत्तदोऽः। एभ्यो ऽः स्यादे।

उपशरदं।

६३ जराया जरस्च।

उपजरसं।

६४ सरजसोपशुने। निपात्ये।

६५ सम्मरःप्रत्यनुभ्योऽक्षः।

समक्षं।

६६ अनः। अनस्तादः स्यादे।

अध्यात्मं।

६७ क्रीवाद्वा।

उपवर्षं उपवर्षा।

६८ अपनदीपौर्णमास्याग्रहायणीगिरे र्वा। उपसमिधं उपसमित् उपगदं उपनदि।

इति वः।

षट्समासः।

६६ पथ्यप्पुरः से। एभ्योऽः स्वार्थे सति। सखि पन्थाः रत्नपथो देशः महापथः दक्षिणापथः चतुष्पथं उपपथं विमलापं सरः विष्णुपुरं।

७० ह्रस्वान्तर्गेर्योऽपोऽनात्। एभ्योऽनवर्णान्तेभ्यो ऽपो ऽकारः ईः स्यात्।
द्वीपं अन्तरीपं समीपं। अनात्मिं प्रापं।

७१ समाधानूपौ। निपात्यौ।
समाधौ देवयजनं अनूपो देशः।

७२ समत्तुमनःकामेऽवश्यंखेऽन्त्यलोपं सममांसौतुहिततते पाकपचनेषा। समत्तु मनःकामयोरवश्यंखे ऽन्त्यलोपं याति समहिततत षोमांसःपाकपचनयोर्वा।
समनाः सकामः। रन्तुमनाः रन्तुकामः अवश्य षेव्यः सहितः संहितः सततः सन्ततः।
मांसपाकः मांसपाकः मांसपचनं मांसपचनं।

७३ धुरोऽनक्षस्याः।
राजधुरा। अक्षस्य तु अक्षधूः।

७४ ऋचः। ऋचः परोऽः स्यात् षे।

अर्द्धर्चे।

७५ नञवहीर्माणवकचरणे।

अनृचो माणवकः वह्वृचश्चरणः अन्यच अनृक् सा म। वह्वृक् यूकं।

७६ प्रत्यन्ववात्सामलोम्नः।

प्रतिषामं प्रतिलोमं।

७७ अक्ष्णोऽचक्षुषि।

गवामक्षीव गवाक्षः। चक्षुषि तु विप्राक्षि।

७८ ब्रह्मर्चहस्तिराजपण्याद्वर्चसः।

ब्रह्मवर्चसं राजवर्चसं पण्यवर्चसं।

७९ समवान्धात्तमसः।

सन्तमसं।

८० श्रोवश्रीयसश्रेयसनिःश्रेयसं। एते निपात्याः।

८१ तप्तान्ववाद्रहसः।

तप्तरहसं।

८२ प्रत्यरसानुगवे। एते निपात्यौ।

८३ गेरध्वनः।

प्राध्वो रथः।

८४ पाण्डूदकक्लृप्तभूमेः।

पाण्डुभूमो देशः।

८५ संख्यायानदीगोदावरीभ्याञ्च।

पञ्चनदं सप्तगोदावरं। दिग्भमः प्रासादः।

८६ निसः शनोडः।

निश्शिंशः निश्शारिंशः।

८७ स्नत्सुरभिपूतेर्गन्धादिर्वानूपमानात्।

सुगन्धिः पद्मगन्धिः पद्मगन्धः।

८८ नार्चायांस्वतेः सख्यादेरः। स्वतिभ्यां परात् सख्यादेरो न स्यात् पूजायां।

शोभनो राजा सुराजा अतिशयेन राजा अतिराजा। अर्चायां किं गामतिक्रान्तः अतिगवः।

८९ किमः क्षेपे।

किं राजा।

९० नञोऽहवे। नञः परात् सखादेरो ष स्यात् नतु हवयोः।

असखा। हवे तु अनपंसरः अधुरं।

९१ पथोवा।

अपन्थाः अपथं। हवे तु अपथो देशः अपथं।

९२ कत्कच्चिरथवदे। कोः स्थाने कत् स्यात् से अजादौ परे।

कदन्नं कत्तयः।

९३ काऽक्षे।

काक्षं।

९४ पथिपुरुषे वा।

कापथः कुपथः कापुरुषः कुपुरुषः।

९५ कोरीषदर्थे।

ईषज्जलं काजलं।

९६ कत्कवीचाग्न्युष्णे।

कदग्निः कवाग्निः काग्निः कदुष्णं कवोष्णं कोष्णं।

९७ ज्योतिर्जनपदराचिनाभिबन्धुगन्धपिण्डलोहितकुक्षिवेणीब्रह्मचारितीर्थपत्नीपत्ते समानः सः।

समानं ज्योतिर्यस्यासा सज्योतिः।

९८ रूपनामगोत्रस्थानवर्णवयोवचनधर्म्मजातीयोदर्य्यैर्वा।

सरूपः समानरूपः।

इति स पादः।

तद्धितः।

१ वाङ्गाद्यतोऽव्यावादेर्गर्गादेर्नडादेः पितृष्वस्रादेरेवत्यादेः शेषश्विवादेः ष्णिष्णेयष्ण्यष्णायणीयष्णिकष्णा अपत्ये। एभ्यः परा एते क्रमात् स्वरपत्ये।

२ णित्तेश्चिराद्यचः शुभगसुपच्चालाद्योस्तु द्युत्तदानां। अर्चां मध्ये आद्यचो श्चिः स्यात् णिति ते परे शुभगादिस्तु दयोर्द्यौः सुपच्चालादेस्तत्तस्य दस्य।

२१ ग्नोर्लोपैतानेऽच्ये। वाहोरपत्यं वाहविः उपविन्दोरपत्यं औपविन्दविः उडुलोम्नोऽपत्यं औडुलोमिः अग्निशर्मणोऽपत्यं आग्निशर्मिः कृष्णस्यापत्यं कार्ष्णिः।

३ ख्योर्युम्दान्ते ऽस्वङ्गध्यङ्गव्यडव्यवहार व्यायामस्वागतस्वध्वरणनः। आद्यचः स्थाने आनयोर्दान्ते खितयोर्यवयोःस्थाने क्रमादिमुमौ स्तो णिति ते नतु स्वङ्गादेः।

४ द्वारस्वरस्वःस्वस्तिस्वादुमृदुव्यस्कसभ्वः श्वन्स्वाक्षतस्वस्वाध्यायस्वग्रामैकन्यग्रोधानां श्वापदन्यङ्क्वोस्तु वा नत्विति श्वादेः। द्वारादे

रदिनीवस्य न्यग्रोधस्य च वैर्धुम् स्यात् स्यापदन्यङ्गो स्त्रवा नतु स्यादेरिकारादौ ते।

वैयश्विः सौवश्विः। स्त्रङ्गादेस्तु स्राङ्गिः व्याङ्गिः व्याडिः।

५ व्यासादेर्ङकण्णौ।

वैयासकिः सौधातकिः आत्रेयः गौभ्रेयः गाङ्गेयः माहेयः यौवतेयः।

६ ओर्लोपोऽकङ्कुपाण्डोरेये। उवर्णस्य ए ये परे लोपः स्यात् नलनयाः।

कामण्डलेयः। तथोस्तु काद्रवेयः पाण्डवेयः।

७ कल्याणीसुभगादुर्भगाबन्धकीरजकीबलीबर्द्धीज्येष्ठाकनिष्ठामध्यमापरस्त्र्यनुसृष्ट्यनुदृष्टिकुलटाभ्यङ्नेयः।

सौभागिनेयः दौर्भागिनेयः।

८ क्षुद्रागोधाभ्योवैरारौ।

नाटेरः नाटारः नाट्यः गौधारः गौधेरः गौधेयः गार्ग्यः वात्स्यः जामदग्न्यः पाराशर्य्यः।

९ ओदौतोऽञ्यक्षत्रियञ्ञ्याः। ओदौञ्यां परस्तसंज्ञः क्षत्रसंज्ञकस्य यः क्यञ्ञ्यौ च अञ्यत् स्यात्।

वाभ्रव्यः नाडायनः गार्ग्यायणः दाक्षायणी पैतृष्वस्त्रीयः मातृष्वस्त्रीयः रैवतिकः आश्वपालिकः यादवः

१० मनवर्ज्जान्वर्ज्जोत्तरपदेनोऽनोऽभात्मनोऽपत्यप्णेऽविकारप्णेऽभावकर्म्मार्थेऽणि नलोपः। मनवर्ज्जस्यापि वर्ज्जण उत्तरपदः स्यात् परस्येन स्यापत्यार्थप्णे ऽनो विकारार्थवर्जे प्णे भावकर्म्मार्थ वर्जे यौ च अभात्मनोरीने नलोपो न स्यात्।

याज्ञवनः भाद्रवर्ज्जणः श्रौत्रणः चाक्रिणः शैवः वा शिष्टः।

११ संज्ञासंभद्राभ्रातुर्ज्ञ्यौ।

दैवातुरः।

१२ नन्पुंसियोः।

पौंसः स्त्रैणः।

१३ कुज्ञादेर्णायन्योऽस्त्रीभ्येऽपत्ये। कुज्ञा देरपत्यार्थे णायन्यः स्यात्तु स्त्रियां न च भ्ये।

कौज्ञायन्यः प्राभ्रायन्यः। स्त्रीभ्ये तु कौज्ञायनी कौज्ञायनाः।

१४ गर्गयस्कविदादिभृभ्वत्रिकुत्साङ्गिरो वशिष्ठगोतमरूढाभ्रुग्भ्येऽस्त्रियां। देवतुल्याख्यः क्षत्रियेो रूढः। एभ्यः परेषामुक्तानां त्यानां भ्ये विहितानां लुक् स्यात् न तु स्त्रियां।

गर्गाः वत्साः यस्काः सङ्काः विदाः उर्व्वाः भृगवः अत्रयः कुत्साः अङ्गिरसः वशिष्ठाः गोतमाः अङ्गाः वङ्गाः कलिङ्गाः। स्त्रियान्तु भार्गव्यः।

१५ ढघेकात्ष्णीककक्षीनेयाश्चानितश्च।
कात्यरा एते पूर्व्वे च सेतो ऽनितश्च खुर्ढे घे च वाच्ये।
तर्कं वेत्ति अधीते वा तार्किकः पदकः क्रमकः वैयाकरणः वाचाछतं वाचिकं पाणिनीयं अत्ता युध्यते ऽसौ आक्षीकः याष्टीकः तिथेन युक्ता रात्रिः तैथी पौषी चचाय साधुः चचियः यज्ञाय हितं यज्ञियं मथुराया आगतः माथुरः इह भवं ऐहिकं। कादाचित्कं यामीणः ग्राम्यः मूर्द्धन्यः नादेयः आक्षीयः नागरः अग्र्यः।

१६ व्यटेर्लोपोऽनाराच्छ्वतोऽध्येऽयौ।
पौनःपुनिकः वाह्नवाहीकः।

१७ नदं तसौत्वल्यर्थे च। अथावचि ये च ते पूर्व्वं दसंज्ञं न स्यात् तान्तसान्तौ तु अल्पर्थे च।
आरातीयः आश्वतिकः।

१८ अक्षोऽक्षोऽनीने।
आक्षिकं। ईने तु द्यूहीनः। सुपाद्यालकः अर्द्धपाद्यालकः दौवारिकः सौवरं सौवं सौवस्तिकं सौवादु

मृदवं वैयल्कसं ग्रैवं ग्रैवनं स्रौयकृतं सौवं सौवाध्यायिकं सौवग्रामिकं नैयग्रोधं। एकेति किं न्यग्रोधमूलिकं ग्रैवापदं श्वापदं नैयङ्कवं न्याङ्कवं श्वागणिकं।

१९ विकारसंघभावेदंहितस्वार्थादौ। एष्वर्थेषु च ते त्याः स्युः।

हेत्वो विकारः हैमः श्वाप्यः श्वाग्नेयः भिक्षाणां समूहः भैक्ष्यं श्वाङ्गं गाणिक्यं राजकं गुरोर्भावः गौरवं यौवनं साम्यं वैरूप्यं राज्यं सौहार्दं विष्णोरिदं वैष्णवं तदीयं माधवनं ग्रैवनं।

२० तद्धेये।

पित्र्यं।

२१ दनषण्धृतराज्ञामुङ्लोपः ष्णे।

वार्त्रघ्नं पौष्णं धार्त्तराज्ञं। एषां किं सामनं।

२२ युष्मदस्मत्त्वन्मदांयुष्माकास्माकतवकममकाः ष्णनीने।

यौष्माकं यौष्माकीणं आस्माकं आस्माकीनं तावकं तावकीनं मामकं मामकीनं स्वार्थाय हितं सौरीयं आगस्तीयं आत्मनीनं चोर एव चौरः चैलोक्यं रामकः।

२३ कोऽकः स्वेच्छे तु वा।

कन्यका सुकन्यकः सुकन्याकः शिवो देवता यस्य सैव मेधः शालेयः।

२४ त्वतौ भावे।
साधुत्वं जडता पाचकत्वं ब्राह्मणीत्वं।

२५ लोकोऽर्थात्सः षष्ठि।
यजुर्वेदस्य मीक्षां।

२६ चत्साम्ये। उपमानार्थे चत् स्यात्।
कृष्ण इव कृष्णवत्।

२७ मतुरस्त्यर्थे।
श्रीरस्ति यस्यासौ श्रीमान् विदुषान् दीप्तान्।

२८ मोऽम्मपादतुः। मकारोऽन्ते ऽवर्णो ऽन्ते मकारान्तादवर्णान्ताच्चम्मपान्ताच्च वतुः स्यादस्त्यर्थे।
सत्त्ववान् यशस्वान् भास्वान् किंवान् ज्ञानवान् विद्यावान् विद्युत्वान्।

२९ स्वम्मेधास्मायादिन् वा।
स्वमी मेधावी तेजस्वी मायावी। पक्षे स्ववानित्यादि।

२० नैकाजादिन् वा। अनेकाचो ऽवर्णान्तादिन् वा स्वादस्यर्थे।

ग्रामी ग्रिमी।

२१ ग्रंकंभ्यांययुततुतिवभाः।
ग्रंथः ग्रंथुः ग्रन्थः ग्रन्थुः ग्रन्तिः ग्रंवः ग्रंभः।

२२ गोतृणमेधादन्तकाण्डद्युवलवलि पर्व्वचूडाफेणलोमपामग्रन्थामधुकेशरजःफलोर्णाभृङ्गनिद्राऽर्शोवातादेर्मिन्सेरोरेरमोलेभ तलेलग्नणरववलेनख्वारकाख्वकिन् वा। एभ्य एते क्रमात् स्वरस्यर्थे वा।

गोमी।

२३ नाम्न्यस्त्यर्थेऽचोर्घः।
स्वामी तृणसः मेधिरः रथिरः दन्तुरः काण्डीरः अण्डीरःद्युमः द्रमः वलूलः वातूलः वलिभः तुन्दिभः पर्व्वतः मरुत्तः चूडालः मांसलः फेणिलः पिच्छिलः लोमग्रः रोमग्रः पामनः अङ्गना ग्रान्थः ग्रान्थुः मधुरः कुञ्जरः केशवःमानवः रजस्वला क्षीवलः फलिनः वर्हिणः जर्णायुः अर्शंयुः भृङ्गारकः वृन्दारकः निद्रालुः दयालुः अर्शसः वैजयन्तः वातकी अतिसारकी।

२४ वाग्मिवाचाटवाचालाः। वाचो ऽस्त्यर्थे एते निपात्यन्ते।

३५ जनखलादिगोरथवातात्तेनचक्रयो लंसंघे।

जनता बन्धुता खलिनी खलिनी गोत्रा रथकथा वातूलः।

३६ संख्यायाडट्पूरणे।

एकादशानां पूरणः एकादशः।

३७ नोऽसंख्यादेर्मट्। असंख्यादेर्नान्तं संख्यायामट् स्यात् पूरणे।

पञ्चमः।

३८ तमट्षष्ट्यादेः। असंख्यादेः षष्ट्यादेः पूरणे तमट् स्यात्।

षष्टितमः षष्ठितितमः संख्यादेस्तु एकषष्टः।

३९ शतादिमासस्सम्वत्सरान्। एभ्यस्तमट् स्यात् पूरणे।

शततमः एकशततमः मासतमः संवत्सरतमः।

४० विंशत्यादेर्व्वा।

विंशतितमः विंशः विंशत्तमः विंशः।

४१ चतुःषडुतिकतिपयात्यट्।

चतुर्थः षष्ठः क्रतियः कतिपयथः।

४२ वडगणपूगसंघातेतिथट्तलोपश्च।
वडतिथः यावतिथः।

४३ द्वितीयतृतीयतूर्य्यतुरीयाः। एते नपा
त्याः।

४४ संख्याया धाच् प्रकारे।
चतुःप्रकारं चतुर्द्धा।

४५ द्वैधं द्वेधा त्रैधं त्रेधा षोढैकध्यं वा।
एते विभाज्ये वा प्रकारे।
पचे द्विधा त्रिधा षड्धा एकधा।

४६ संख्याया अवयवे तयट्।
चतुरवयवं चतुष्टयं।

४७ द्वित्रेर्व्वाऽयट्।
द्वयं द्वितयं त्रयं त्रितयं।

४८ तरतमौदिवङ्गनामेकोत्कर्षे। द्वयो
रेकस्यातिशये तरो वङ्गनां तमः स्यात्।
अयमनयोरतिशयेन विद्वान् विद्वत्तरः। अय
मेषामतिशयेन विद्वान् विद्वत्तमः शुभ्रतरा शुभ्रतमा।

४९ रूपकल्पचेलूप्स्वंवाक्तिपुम्वच्च। चका

९७ ज्योतिर्जनपदरात्रिनाभिबन्धुनाम्नि पिण्डलोहितकुक्षिवेणीब्रह्मचारितीर्थपत्नी पत्ते समानः सः।

समानं ज्योतिर्यस्यासौ सज्योतिः।

९८ रूपनामगोत्रस्थानवर्णवयोवचनधर्म्मजातीयोदर्य्यैर्वा।

सरूपः समानरूपः।

इति स पादः।

तद्धितः।

१ वाक्राद्यतोऽव्यावादेर्गर्गादेर्ञ्यादेः पितृष्वस्रादेरेवत्यादेः शेषश्विवादेः ष्णिष्णेयष्ण्यष्णायणणीयष्णिकष्णा अपत्ये। एभ्यः परा एते क्रमात् स्वरपत्ये।

२ णित्तेभ्रिराद्यचः शुभगसुपश्चालाद्योस्तु द्युक्तदानां। अचां मध्ये आद्यचो भ्रिः स्यात् णिति ते परे शुभगादिषु द्वयोर्द्वयोः सुपश्चालादेश्चान्तस्य दस्य।

२१ ग्नोर्लोपैतौतेऽच्ये। वाहोरपत्यं वाहविः उपविन्दोरपत्यं औपविन्दविः उडुलोम्नोऽपत्यं औडुलोमिः अग्निशर्मणोऽपत्यं आग्निशर्मिः कृष्णस्यापत्यं कार्ष्णिः।

३ ग्नोर्युम्दान्ते ऽस्वङ्गध्यङ्गव्यङव्यवहार व्यायामस्वागतस्वध्वरणनः। आद्यचः स्याने ग्नयोर्दान्ते खितयोर्यवयोः स्याने क्रमादिमुमौ स्तो णिति ते नतु स्वङ्गादेः।

४ द्वारस्वरस्वःस्वस्तिस्वादुमृदुव्यल्कसश्वःश्वन्स्वश्वकृतस्वस्वाध्यायस्वग्रामैकन्यग्रोधानां स्वापदन्यङ्कोस्तुवा नत्विति स्वादेः। द्वारादे

एदितीयस्य न्यगोधस्य च द्वैरूप्यम् स्यात् आपदन्यङ्गो
स्त्र्या नतु भादेरिकारादौ ते।
वैयश्विः वैवश्विः। खङ्गादेस्तु खाङ्गिः व्याङ्गिः व्याडिः।

५ व्यासादेर्ङकण्णौ।
वैयासकिः वैधातकिः आत्रेयः गौभ्रेयः गाङ्गेयः
आहेयः यौवतेयः।

६ ओर्लोपोऽकङ्कुपाण्ड्वोरेये। उवर्णस्य ए
ये परे लोपः स्यात् नलनयाः।
कामण्डलेयः। तयोस्तु काद्रवेयः पाण्डवेयः।

७ कल्याणीसुभगादुर्भगावन्ध्यकीरजकी
बलीवर्द्धीज्येष्ठाकनिष्ठामध्यमापरस्त्र्यनुसृष्ट्या
नुदृष्टिकुलटाभ्यइनेयः।
सौभागिनेयः दौर्भागिनेयः।

८ क्षुद्रागोधाभ्योवैरारौ।
नाटेरः नाटारः नाट्टेयः गौधारः गौधेरः गौधेयः
गार्ग्यः वात्स्यः ग्रामदग्नः पाराशर्य्यः।

९ ओदौतोऽव्वत्तद्धयक्ष्याः। ओदौङ्गां
मरतसंज्ञः क्तसंज्ञकस्य यः क्यङ्योच अव्वत् स्यात्।
वाभ्रव्यः नाडायनः गार्ग्यायणः दाक्षायणी पैतृष्व
स्रीयः मातृष्वस्रीयः रैवतिकः आश्वपालिकः यादवः

१० मनवर्जान्नवर्म्नोश्चस्नेनोऽनोऽध्यात्मनोऽपत्यष्णेऽविकारष्णेऽभावकर्मार्थयुञ्नेमनलोपः। मनवर्जस्यानो वर्मण उत्तरः स्यात् परस्नेन स्नापत्यार्थष्णे ऽनो विकारार्थवर्जे ष्णे भावकर्मार्थवर्जे ये च अध्यात्मनोरीने नलोपो न स्यात्।

आज्यनः भाद्रवर्मणः औक्षणः चाक्रिणः शैवः वाशिष्ठः।

११ संख्यासंभद्राभ्यामातुर्ऋणे।

द्वैमातुरः।

१२ नन्पुंस्त्रियोः।

पौंस्नः स्त्रैणः।

१३ कुञ्जादेर्ढायन्योऽस्त्रीभ्येऽपत्ये। कुञ्जादेरपत्यार्थे ढायन्यः स्यात्तु स्त्रियां न च भ्ये।

कौञ्जायन्यः प्राप्रायन्यः। स्त्रीभ्ये तु कौञ्जायनी कौञ्जायनाः।

१४ गर्गयस्कविदादिभृग्वत्रिकुत्साङ्गिरोवशिष्ठगोतमरूढाञ्ञ्यङ्भ्येऽस्त्रियां। देवतुल्याख्यः क्षत्रियो रूढः। एभ्यः परेषामुक्तानां त्यानां भ्ये विहितानां लुक् स्यात् न तु स्त्रियां।

गर्गाः वत्साः यस्काः सङ्काः विदाः उर्व्वाः भृगवः अत्रयः कुत्साः अङ्गिरसः वशिष्ठाः गोतमाः अङ्गाः वङ्गाः कलिङ्गाः। स्त्रियान्तु भार्गव्यः।

१५ ढघेकात्ष्णीककाक्षीनेयाञ्चानितञ्च।
कात्यरा एते पूर्व्वे च सेतो ऽनितञ्च खुर्ढे घे च वाच्ये।
तर्कं वेत्ति अधीते वा तार्किकः पदकः क्रमकः वैयाकरणः वाचाद्यतं वाचिकं पाणिनीयं ग्रन्थं युध्यते ऽसौ ग्रान्थिकः याष्टीकः तिथेन युक्ता रात्रिः तैथी पौषी चत्वाय साधुः चत्वियः यज्ञाय हितं यज्ञियं मथुराया आगतः माथुरः इह भवं ऐहिकं। कादाचित्कं यामीणः ग्राम्यः मूर्द्धन्यः नादेयः शालीयः नागरः अग्र्यः।

१६ व्यटेर्लोपोऽनाराच्छ्वतोऽध्येऽयौ।
पौनःपुनिकः वाक्यवाहीकः।

१७ नदं तसौत्वल्यर्थे च। अथावचि ये च ते पूर्व्वं दसंज्ञं न स्यात् तान्तसान्तौ तु अल्यर्थे च।
आरातीयः ग्राश्वतिकः।

१८ अक्षोऽक्षोऽनीने।
आक्षिकं। ईने तु द्यूहीनः। सुपाद्यालकः अर्द्धपाद्यालकः दौवारिकः सौवरं सौवं सौवस्तिकं सौवादु

मृदवं वैयस्कयं शौचं शौवनं स्कैयङ्कतं सौवं सौवाध्या यिकं सौवग्रामिकं नैयग्रोधं। एकेति किं न्यायोधमू लिकं शौवापदं श्वापदं नैयङ्कवं न्याङ्कवं श्वागणिकं।

१९ विकारसंघभावेदंहितस्वार्थादौ। एष्व र्थेषु च ते त्याः स्युः।

हेमो विकारः हैमः आप्यः आग्नेयः भिक्षाणां समू हः भैक्ष्यं आङ्कं गाणिक्यं राजकं गुरोर्भावः गौरवं यौवनं साम्यं वैरूप्यं राज्यं सौहार्दं विष्णोरिदं वैष्णवं तदीयं माधवनं शौवनं।

२० चट्टोये।

पित्वं।

२१ ह्वनषणधृतराज्ञामुङ्लोपः ष्णे।

वार्त्रघ्नं पौष्णं धार्त्तराज्ञं। एषां किं सामनं।

२२ युष्मदस्मत्त्वन्मदांयुष्माकास्माकतवक ममकाः ष्णनीने।

यौष्माकं यौष्माकीणं आस्माकं आस्माकीनं तावकं तावकीनं मामकं मामकीनं स्वर्भाय हितं सौरीयं आगस्तीयं आत्मनीनं चोर एव चौरः चैलोक्यं रा मकः।

२३ कोऽकः स्वोढे तु वा।

कन्यका सुकन्यकः सुकन्यकः शिवो देवता यस्य सैव शैवः शाक्तेयः।

२४ त्वतौ भावे।
साधुत्वं जडता पाचकत्वं ब्राह्मणीत्वं।

२५ लोकोऽर्घात्सः षष्ठि।
वज्रं शक्तु मीक्षं।

२६ चत्साम्ये। उपमानार्थे चत् स्यात्।
कृष्ण इव कृष्णवत्।

२७ मतुरस्त्यर्थे।
श्रीरस्ति यस्यासौ श्रीमान् विद्वान् शोभान्।

२८ मोऽम्मपादतुः। मकारोऽन्ते ऽवर्णो ऽन्ते मकाराभादवर्णमन्ताज्जम्पादाच्च वतुः स्यादस्त्यर्थे।
लक्ष्मीवान् यशस्वान् भास्वान् किंवान् ज्ञानवान् विद्यावान् विद्युत्वान्।

२९ स्वम्मेधास्रायादिन् वा।
स्वमी मेधावी तेजस्वी मायावी। पक्षे स्ववानि त्यादि।

२० नैकाजादिन् वा। अनेकाचो ऽवर्णान्तादिन् वा स्वादरूपार्थे।

मानी मिखी।

२१ मंकंभ्यांययुततुनिवभाः।

मंथः मंधुः मन्तः मन्धुः मन्तिः मंवः मंभः।

२२ गोतृणमेधादन्तकाण्डशुवलवलि पर्व्वचूडाफेणलोमपामप्रश्नामधुकेशरजःफलोर्णाभृङ्गनिद्राऽर्शोवातादेर्मिन्सेरेरेरमोसेभ तसेलग्नणरववलेनख्वारकाल्वकिन् वा। एभ्य एते क्रमात् स्वरूपार्थे वा।

गोमी।

२३ नाम्यरूप्यर्थेऽचोर्घः।

खामी तृणघः मेधिरः रधिरः दन्तुरः काण्डीरः शुवीरः शुमः द्रमः वलूलः वातूखः वलिभः तुन्दिभः पर्व्वतः मरुन्तः चूडालः मांसलः फेणिलः पिच्छिलः लोमशः रोमशः पामनः शङ्गा प्राश्नः आङ्गः मधुरः कुञ्जरः केशवःमानवः रजस्वला क्षणीवलः फलिनः वर्हिणः ऊर्णायुः भृङ्गारकः वृन्दारकः निद्रालुः दयालुः अर्शसः वैजयन्तः वातकी अतिसारकी।

२४ वाग्मिवाचाटवाचालाः। वाचो ऽस्यर्थे एते निपात्यन्ते।

३५ जनखलादिगोरथवातात्तेनत्रकञौ संसंघे।

जनता बन्धुता खलिनी खलिनी गोत्रा रथकथा वातूलः।

३६ संख्यायाऽट्पूरणे।

एकादशानां पूरणः एकादशः।

३७ नोऽसंख्यादेर्मट्। असंख्यादेर्नान्तं संख्यायामट् स्यात् पूरणे।

पञ्चमः।

३८ तमट्षष्ठ्यादेः। असंख्यादेः षष्ठ्यादेः पूरणे तमट् स्यात्।

षष्टितमः षष्ठितमः संख्यादेस्तु एकषष्टः।

३९ ऋतादिमाससम्वत्सरात्। एभ्यस्तमट् स्यात् पूरणे।

ऋततमः एकऋततमः मासतमः संवत्सरतमः।

४० विंशत्यादेर्वा।

विंशतितमः विंशः विंशत्तमः विंशः।

४१ चतुःषडुतिकतिपयात्यट्।

चतुर्थः षष्ठः कृतिथः कतिपयथः।

४२ वडुगणपूगसंघातेष्वितिथटतलोपश्च।
वडतिथः यावतिथः।

४३ द्वितीयतृतीयतूर्य्यतुरीयाः। एते नपा
त्याः।

४४ संख्याया धाच् प्रकारे।
चतुःप्रकारं चतुर्द्धा।

४५ द्वैधं द्वेधा त्रैधं त्रेधा षोढैकध्यं वा।
एते निपात्यन्ते वा प्रकारे।
पक्षे द्विधा त्रिधा षड्धा एकधा।

४६ संख्याया अवयवे तयट्।
चतुरवयवं चतुष्टयं।

४७ द्वित्रेर्व्वाऽयट्।

द्वयं द्वितयं त्रयं त्रितयं।

४८ तरतमौदिवङ्नामेकोत्कर्षे। द्वयो
रेकस्यातिशये तरो वङ्नां तमः स्यात्।
अयमनयोरतिशयेन विद्वान् विद्वत्तरः। अय
मेषामतिशयेन विद्वान् विद्वत्तमः शुभ्रतरा शुभ्रतमा।

४९ रूपकल्पचेलूपसंवाद्रिक्तुपुम्वच्च। चका

रान्तरतम रूपकल्पेषु ईवल्लमूवल्लञ्च खं स्यादा उदहिन्तु पुम्बच।

खितरा खीतरा वामोरुतरा वामोरूतरा। विदु षितरा विदुषीतरा विद्वत्तरा यतितरा यतीतरा यत्तरा।

५० त्यादेश्चरूपः। खेस्यादेरीत्कर्षे रूपः स्यात्।

पटुरूपः पचतिरूपं।

५१ किमेय्याद्यद्व्येचतरांचतमां। किम एतदन्यादाद्यन्ताच्च द्विवहुनामीत्कर्षे चतरां च तमां स्तो न तु द्व्ये।

किन्नरां प्राक्षेतरां उच्चैस्तरां पचतितरां। एवं चतमां। द्व्ये तु उच्चैस्तरस्तरः।

५२ गुणादेष्ठेयस्। गुणवाचिनो द्विवहुना मीत्कर्षे क्रमादिष्ठेयस् ईयस्विष्ठौ वा स्तः।

५३ ज्रीमंस्वडिन्नैकाचः। ज्रिरिमन् दृढ ईद्र स्य अनेकाचो खेः परो डित् स्यात्।

लघिष्ठः लघीयान्।

५४ लुप्तदृदिनां।

मतिष्ठः मेधिष्ठः।

५५ तृणखोप्यः।

करिष्ठः।

५६ बाढान्तिकस्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रप्रिय स्थिर स्फिरोरु गुरु बहुल तृप्र दीर्घ वृत्त वृद्ध वृन्दारकाः साधनेदस्थवदव यवज्येष्ठोद् प्रख्य स्फवरमरबंहज्यपद्राघभ्रुस्वर्षवृन्दाः। एषां स्थाने क्रमादेते स्वर्ग्यादिषु।

साधिष्ठः नेदिष्ठः स्थविष्ठः दविष्ठः यविष्ठः क्षेपिष्ठः स्वादिष्ठः प्रेष्ठः स्फेष्ठः स्फीष्ठः वरिष्ठः गरिष्ठः बंहिष्ठः ज्यपिष्ठः द्राघिष्ठः भ्रुसिष्ठः वर्षिष्ठः वृन्दिष्ठः।

५७ प्रशस्यः श्रः।

श्रेष्ठः।

५८ ज्योवृद्धज्येयस्न्याः। वृद्धः प्रशस्यस्न्या दाद्यः स्यात् तस्याज्येयसौ श्राः स्यात्।

ज्येष्ठः ज्यायान्।

५९ पृथुमृदु भृषभृशदृढपरिवृढस्थूलैः। एषा मृकारस्य भ्यादा रः स्यात्।

प्रथिष्ठः।

६० युवाल्पौकन्वा।

कनिष्ठः यविष्ठः अल्पिष्ठः एवमीयसूः।

६१ गुणादिमन् भावे। गुणवाचिन इमन् स्याद्भावे।

लघिमा।

६२ भूयोभूमभूयिष्ठाः। बहोरोयस्विमज्विष्ठा नस्य क्रमादेते निपात्यन्ते।

६३ त्यादेश्चानेकल्पदेश्यदेशीयाः। लेख्या यन्नाच ईषदूने ऽर्थे एते स्युः।

ईषदूनो विद्वान् विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः तार्किकदेशीयः पचतिकल्पं।

६४ लेर्व्वङ्गः प्राक्।

ईषदूनः पटुः वङ्गपटुः।

६५ पाशः कुत्सायां।

कुत्सितो भिषक् भिषक्पाशः।

६६ चरट्भूतपूर्व्वे।

भूतपूर्व्व आढ्यः आढ्यचरः।

६७ व्याख्यस्य। यन्नादूयसरट् स्यात् भूत पूर्व्वे ऽर्थे।

कृष्णस्य भूतपूर्व्वा गौः कृष्णरूपः कृष्णचरः शुभ्रा रूप्यः शुभ्रचरः।

६८ वङ्कृत्यार्थात्काच्चशस्वा। वङ्कर्थाद् त्यार्थाच्च कात्परश्चशस् स्यादा।
वङ्कशो देहि भूरिशः अल्पशः श्लोकशः।

६९ संख्यैकार्थाद्वीप्सायां।
कतिकति कतिशः गणशः यावच्छः तावच्छः द्विशः पादशः।

७० चङ्कृत्वस्वारे। सङ्ख्यायाश्चङ्कृत्वस्स्यादारे
कतिधारान् भुङ्क्ते कतिचङ्कृत्वः गणचङ्कृत्वः पञ्चचङ्कृत्वः।

७१ सुच्चतुर्द्वित्रेः। एभ्यः सुच् स्यादारे।
चतुः द्विः त्रिः।

७२ मयट् तद्रूपे। तदात्मके ऽर्थे मयट् स्यात्।
विष्णात्मकं विष्णुमयं वाङ्मयं।

७३ प्रकारे जातीयः।
तार्किकजातीयः

७४ वित्तेचुच्चुचनौ।
विद्याचुच्चुः विद्याचनः।

७५ निर्वृत्ते भावादिमः।
पाकिमः।

७६ पशुभ्यःस्थानद्विषट्केगोष्ठगोयुगषड्भवं।

गोगोष्ठं गोगोयुगं गोषड्भवं।

७७ शुण्डोत्तभ्योऽपकर्षेरष्टरौ।

अपकृष्टा शुण्डा शुण्डारः शमीरः कुटीरः उत्तरी।

७८ पीलुतिलोमाकर्णादेःकुणतैलकटजाहं पाकक्लेदरजोमूले।

पीलुकुणः तिलतैलं उमाकटः कर्णजाहं।

७९ क्षेत्रेशाकटशाकिनौ।

इक्षुशाकटं इक्षुशाकिनं।

८० इतोऽस्य जाते।

फलितं।

८१ द्विःक्षुभस्तद्भूततद्भावेऽस्वीर्थावव्यक्ष। अभूततद्भावे ऽर्थे क्षुभादिषु परेषु द्विः स्यात् तस्मिंश्चावर्णस्वरीकारश्चोसो न तु व्यक्ष।

८२ त्योवमात्रोलोप्यः। वकारमात्रस्योसो पः स्यात्।

अशुक्लं शुक्लं करोति शुक्लीकरोति शुक्लीभवति शुक्लीस्यात्।

८३ यङ्च्व्यक्षेचर्ङ्यौ। चकारो ऱ्यौ स्यात् यङि च्वौ क्यौ चौ च।

भाजीकरोति।

८४ मनश्चक्षुश्चेतोऽरुरजोरहोऽभ्यश्चोपश्चौ।

मनीकरोति।

८५ कार्ष्ण्यायत्व्योःसंपद्यकृदौचसाद्वा। चाकर्षे ऽधीनत्वे च सम्पद्यतिकृभ्वस्तिषु परेषु चसात् स्याद्वा।

शत्रुं सवशं वशं सम्पद्यते वशसात् सम्पद्यते राजायत्तं सम्पद्यते राजसात् सम्पद्यते।

८६ देयेत्राच्च। देये ऽर्थे त्राचसाच स्यात् संपद्यादौ।

देवाय देयं करोति देवत्राकरोति देवसात्करोति।

८७ नैकाचोऽव्यक्तानुकरणाद्द्राच्वाऽनितौदित्यौ। अनेकाचो ऽव्यक्तानुकरणात् सम्पद्यादौ द्राच् स्याद्वा नलितौ तस्मिंश्च दिर्भावः।

८८ तलोप्योऽनष्टिस्थितौ दैर्घ्यतो वा। तस्मादमस्य तलोप्यो डाचि दृतौ तु टिर्लोप्यः दैर्घ्य लो लोप्यो वा।

पटपटाकरोति। एकाचस्तु अक्करोति। दृतौ तु पटदिति करोति पटिति पटत्पटेति पटत्पटदिति।

८९ तीयसम्बीजसंख्यादिगुणात्क्रञि क्रषौ। एभ्यः करोतौ डाच् स्यात् क्रञि क्रषौ।

दितीयं कर्षणं करोति दितीयाकरोति सम्बाकरोति बीजेन यद् कर्षति बीजाकरोति दिगुणा करोति।

९० समय निष्कुल दुःखसूत्रसत्याद्यापन निष्क्रोषप्रातिकूल्यपाकाऽध्वपथे। एभ्यः क्रमादेभ्यर्थेषु डाच् स्यात् क्रञि परे।

समयाकरोति निष्कुलाकरोति दुःखाकरोति सूत्राकरोति सत्याकरोति।

९१ सपत्र निष्पत्रात्प्रिय सुखाभद्रभद्रात्पीडानुकूल्यवपने। एभ्यः क्रमादेतेभ्यर्थेषु डाच् स्यात् क्रञि।

सपत्राकरोति निष्पत्राकरोति प्रियाकरोति सुखाकरोति भद्राकरोति। भद्राकरोति।

९२ दण्डमानबन्धसङ्ख्याने। परिमाणार्थे एते स्युः।

गजपरिमाणो गजदण्डः गजमानः गजबन्धः।

९३ संख्याशतशतोडिन्।

दशी विंशी।

९४ कतियतितितियावत्तावदेतावत्किय दियन्तः। किंयत्तदां डत्यन्तानां यत्तदेतत्किमिदमां वत्यन्तानामेते क्रमात् निपात्यन्ते माने।

९५ दशादेर्डीयुत्तेशतादौ।

एकादशं शतं विंशं शतं।

९६ किंयत्तदेकान्यादिवद्गणनामेकनिर्द्धारणेऽतरडतमौ।

अनयोः कतरो वैष्णवः। एषां कतमः शैवः।

९७ तस्तेः। निःस्थाने तस् स्यात्।

कुण्डतः सर्व्वतःअमुतः।

९८ देवादेर्दीर्घ्योल्लाच्।

देवत्रा वन्दे रमे वा।

९९ त्रिवद्वोल्लोऽह्नादेःप्रायाः। त्रेर्वोल्लोप रक्षाः स्याच्चः स्यात् न तु द्व्यादयुष्मदः।

सर्व्वस्मिन् सर्व्वत्र तत्र वत्र च।

१०० सर्व्वैकात्काले दा।

सर्व्वस्मिन् काले सर्व्वदा।

१०१ किमन्ययत्तदोर्हिश्च। एभ्यः प्राग्हिर्दा च स्यात् काले।

कस्मिन् काले कर्हि कदा।

१०२ तदोदानींवा।

तदा तदानीं।

१०३ पूर्व्वान्यान्यतरेतरापराधरोत्तरोभयादेर्द्युसञ्ज्ञि।

पूर्व्वस्मिन्नह्नि पूर्व्वेद्युः।

१०४ दिक्शब्दाहिग्देशकालेस्तात् त्रीपि म्योऽचोलुक्।

परस्तात् प्राक्।

१०५ वैनोपी।

पूर्व्वेण।

१०६ दक्षिणोत्तराद्यौ।

दक्षिणा दक्षिणाहि उत्तरा उत्तराहि।

१०७ वाधराच्चात्ताः।
अधरात् अधरस्मात् दक्षिणात् दक्षिणस्मात्।

१०८ पूर्वाधरावराःपुराधावास्तादसोः।
पुरस्तात् पुरः अधस्तात् अधः अवस्तात् अवः। अनएव अस्।

१०९ चवत्थाच् प्रकारे। येभ्यश्च उक्तेभ्यः प्रकारे थाच् स्यात् स च तद्वत्।
सर्व्वप्रकारं सर्व्वथा।

११० कुतः क्व कुह कुत्रेतोऽतोऽत्रेहसदैतर्ह्यऽधुनेदानीं पश्चादुपर्य्युपरिष्टात्परेद्यविस द्योद्यैषमःपरुत्पराराीत्थं कथं। एते निपात्यन्ते। कस्मात् कुतः कस्मिन् क्व कुह कुत्र अस्मात् इतः एतस्मात् अतः एतस्मिन् अत्र अस्मिन् इह सर्व्वदा सदा अस्मिन् काले एतर्हि अधुना इदानीं पश्चिमं पश्चात् ऊर्द्ध उपरि उपरिष्टात् परस्मिन्नहनि परेद्यवि समाने ऽह्नि सद्यः अस्मिन्नहनि अद्य अस्मिन् वर्षे ऐषमः पूर्व्वस्मिन् वर्षे परुत् पूर्व्वतरे वर्षे परारि इदं प्रकारं इत्थंकिं प्रकारं कथं।

१११ त्यदाद्यचिरदक्षिणाद्यादेस्त्यदनत्र त्यणमा भवादौ। एभ्य एते क्रमात् स्वर्भवाद्यर्थे। त्यदत्यः तदत्यः अद्यतनी श्वस्तनी चिरत्नः परत्नः दाक्षिणात्यः पाश्चात्यः आदिमः मध्यमः।

११२ किमः त्यन्ताच्चिच्चनौ।

कश्चित् कदाचन।

११३ आदिस्तः। चैकाचुदसहोरित्येनमकारमारभ्य यत्र उक्तः स तसंज्ञः स्यात्।

इति तपादः।

संज्ञा।

अथ त्यादिरुच्यते।

१ धोस्सिप् तस् अन्ति सिप् थस थ मिप् वस् मस् ९। ते आते अन्ते से आथे ध्वे ए वहे महे। १८। यात् यातां युस् यास् यातं यात यां याव याम ९। ईत ईयातां ईरन् ईथास् ईयाथां ईध्वं ईय ईवहि ईमहि। १८। तुप् तां अन्तु हि तं त आनिप् आवप् आमप् ९। तां आतां अन्तां स्व आथां ध्वं ऐप् आवहैप् आमहैप्। १८। दिप् तां अन् सिप् तं त अमप् व म ९। त आतां अन्त थास् आथां ध्वं द् वहि महि। १८। दि तां अन् सि तं त अम् व म ९। तन् आतां अन्त थास् आथां ध्वं द् वहि महि। १८। णप् अतुस् उस् थप् अथुस् अ णप् व म ९। ए आते इरे से आथे ध्वे ए वहे महे। १८। ता तारौ तारस् तासि ताथस् ताथ तास्मि तास्वस् तास्मस् ९। ता तारौ तारस् तासे तासाथे ताध्वे ताहे

तास्वहे तास्महे। १८। यात् यास्तां यासुस् यास् यास्तं यास्त यासं यास्व यास्म ९। सीष्ट सीयास्तां सीरन् सीष्ठास् सीयास्तां सीध्वं सीय सीवहि सीमहि। १८। स्यति स्यतस् स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्यावस् स्यामस् ९। स्यते स्येते स्यन्ते स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे। १८। स्यत् स्यतां स्यन् स्यस् स्यतं स्यत स्यं स्याव स्याम ९। स्यत स्येतां स्यन्त स्यथास् स्येथां स्य ध्वंस्ये स्यावहि स्यामहि। १८। एतानि सप्तती तिव्रतसंज्ञकानि धोः पराणि प्रयुज्यन्ते।

२ क्ङीखीगीघीटीठीडीढीतीथ्योऽष्टादशशः। तान्यष्टादशाष्टादश क्रमादेतत्संज्ञानि स्युः।

३ पञ्च रः ग्निश्च। ताः पञ्च रसंज्ञाः स्युः ग्निश्च।

४ नवशः पमेञितोऽन्यङिङ्ग्घाघैं। तानि नव नव क्रमात् पमसंज्ञानि स्युस्ते च ञितौ धोः परे स्युः तदन्यङिङ्घान्तु क्रमेण सौ घै।

५ ङिदपिद्रः। अपिद्रो ङित् स्यात्।

६ कित्ठीढीर्षं। अपित् ठी ढ्यः षं च कित् षंज्ञं स्यात्।

७ दाघादा। अपिद्राधा च दार्षंज्ञः स्यात्।

८ यलोऽचेऽजिः। अचायुक्तस्य यलस्य स्थाने इक् क्रमात् जिसंज्ञः स्यात्।

९ सकृद्दिस्तु वा। जिः पुनर्न स्यात् दिस्तु वा स्यात्।

१० प्राग्वृकार्य्यादचिदिः।

११ द्वेःपूर्व्वः खिः। द्वेर्धोः पूर्व्वो भागः खिसंज्ञः स्यात्।

१२ स्वर्वोधुरू। खो धुसंज्ञो धौ रूसंज्ञः स्यात्।

१३ खस्योरुः। खे परे खो रूसंज्ञः स्यात्।

इति संज्ञा पादः।

पक्षत्।

भूतिप् इति स्थिते।

१४ वेशप्रे। रेपरे धोः प्रप् स्यादृधेऽर्थे।

१५ णुर्घूङ्स्याकञ्तिति। अनयो घुसंज्ञकस्य धुः स्यात्तु किति ञ्तिति।

भवति भवतः।

१६ लोपोऽनोऽदेचोः। अकारस्य लोपःस्यादकारे एचि च परे।

भवन्ति भवसि भवथः भवथ।

१९ आमिमभवि। भवामि भवावः भवामः।

१७ भुवःप्राप्तौ वा मं। प्राप्तौभुवो मं स्यादाचे।

भवते।

१८ याथातोऽतः। अकारात् परयोराथातोराकारद्वैः स्यात्।

भवेते भवन्ते भवसे भवेथे भवध्वे भवे भवावहे भवामहे।

१९ स्यायायुस्यामामीयसीयम्। अका

रात्परेषां यथा युष्मद् अस्मद् एषां स्थाने ईयुस् ईयम् इमे अस्मात् स्युः।

भवेत् भवेतां भवेयुः भवेः भवेतं भवेत भवेयं भवेव भवेम। भवेत भवेयातां भवेरन् भवेथाः भवेयाथां भवेध्वं भवेय भवेवहि भवेमहि। भवतु भवतां भवन्तु।

२० हेर्लोपोऽशोश्च। अकारादशभ्यामुप्तुभ्याञ्च हेर्लोपः स्यात्।

भव भवतं भवत भवानि।

२१ व्यञ्जन्यनुकारडाच्चिच्चकणेऽलंसम्मनोऽदोऽन्तः पुरोऽस्तिरःकारिकोर्यादेर्धीसः। एषांव्यागां धी परदेसः स्यात्।

२२ ग्राम्यश्रोणेऽन्तरदुर्गेर्नादिहन्मीनाहिन्यानिप् ग्राम्तनशोगदनदपतपद्दामासोहन् वाथघ्राध्मावपवहश्रमचिदिहन्तनेर्वोत्वननिंशनिन्दनिक्षमवाम्तहनोऽकखाद्यषाम्तान्तनेः। नादेर्धीर्हन्तेर्मीनातेर्हिनोतेरानिपःग्राम्तनशो गदाद्यम्तनेश्च नखान्तरो दुर्वर्जगेश्च परस्य णविधिहेतौ सति णः स्यात्। अनादेर्मवाम्तहनेः कादिखादि षान्तवर्ज्यध्वम्तनेश्च वा स्यात्।

अभ्यर्भवाणि प्रभवाणि दुरस्तु दुर्भवानि भवाव भवाम भवतां भवेतां भवन्तां भवस्व भवेथां भवध्वं भवै भवावहै भवामहै।

२३ घोटीथीष्वम्धोरमा। आसु परासु धोरम् स्यात् न तु मायोगे।

अभवत् अभवतां अभवन् अभवः अभवतं अभवत अभवं अभवाव अभवाम। अभवत अभवेतां अभवन्त अभवथाः अभवेथां अभवध्वं अभवे अभवावहि अभवामहि।

२४ व्यांसिः। धोः षिः स्यात् व्यां।

२५ भूस्थापिवदेनो लुक् पे। एभ्यः सेर्लुक् स्यात् पे।

अभूत् अभूतां।

२६ भुवोवन्टीद्यचि। भुवो वन् स्यात् टी द्योरचि परे।

अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम।

२७ वसोऽस्थेमनौदितः। अनौदितोधोः परस्यास्थस्य वसस्य इम् स्यात्। अभविष्ट अभविषातां।

२८ मान्तोऽदनतः। मस्यान्तस्यस्य अत् स्यान्नकारात् परस्य।

अभविषत अभविष्टाः अभविषाथां।

२९ धेसलोपो वा। धे परे सस्य लोपो वा स्यात्।

३० टीठीढीधोढिचः सेमस्तु ढलोवा। टचः परस्यासां धस्य ढः स्यात् सेम्ढलात् परस्य तु वा स्यात्। अभविढं अभविध्वं। ४३ अपञ्चमेरिति सस्य ढः। अभविढ्वं। अभविषि अभविष्वहि अभविष्महि।

३१ धुर्दिष्यङि। यामङि च धुर्दिः स्यात्।

३२ झभखयढधकृणां जवचप जस्वचाः खेः। खेर्झभ खय ढकार धं कवर्ग चवर्णानां क्रमा ज्जव चप जकार ख चवर्गाकाराः स्युः।

३३ भुवो ऽङ्यांढभावे तु वा। भुवः खेरङ् स्यात् यां ढभावयोस्तु वा।

वभूव वभूवतुः वभूवुः वभूविथ वभूवथुः वभूव व भूव वभूविव वभूविम। वभूवे वभूवाते वभूविरे वभूविषे वभूवाथे वभूविढ्वे वभूविध्वे वभूवे वभूविवहे वभूविमहे। ढे भावे च वभूवे वुभूवे इतिप्रयोगौ। भ विता भवितारौ भवितारः भवितासि भवितास्थः

भवितास्व भवितास्मि भवितास्वः भवितास्मः। भविता भवितारौ भवितारः भवितासे भवितासाथे भविताध्वे भविताहे भवितास्वहे भवितास्महे। भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म। भविषीष्ट भविषीयास्तां भविषीरन् भविषीष्ठाः भविषीयास्थां भविषीढ्वं भविषीध्वं भविषीय भविषीवहि भविषीमहि। भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः। भविष्यते भविष्येते भविष्यन्ते भविष्यसे भविष्येथे भविष्यध्वे भविष्ये भविष्यावहे भविष्यामहे। अभविष्यत् अभविष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभविष्याम। अभविष्यत अभविष्येतां अभविष्यन्त अभविष्यथाः अभविष्येथां अभविष्यध्वं अभविष्ये अभविष्यावहि अभविष्यामहि।

भवतकि भवतकः प्रणिभवति प्रनिभवति। एवं चेतीत्यादयः।

चिञ् चेतने।

३४ रुदाद्यस्तिसेर्हिस्योरीम्। एभ्यो दिस्योरीम् स्यात्।

३५ झस्स्वाज्झसीमईमि सेर्लोपः। झसात् स्वाच्च परस्य झसि दमः परस्य ईमि सेर्लोपःस्यात्।

अचेतीत् अचेतिष्टां।

३६ अनुस्सिद्देरभुवः। सेर्देश्च परस्यानउस् स्यात् नतु भुवः।

अचेतिषुः अचेतीः।

४ दृसात्तयोर्वाऽरे। दृशात् परयोः काम्यक्यङोर्लोपः स्याद्वाऽरे।

समिधिता समिधिता। २ अन्यात् किं किंकाम्यति किंकाम्यति।

५ धनोदकाभ्यनवृग्भ्यस्तेर्मत्वर्थानाम्नि भार्थे डाडनङ् कामन्यस्तदसनौ को न षः। धनश्च यश्च उदकञ्च पानं धनङ् अम्नश्च ते ङा वृषान्नयोर्थाभे यन् तेरर्थे काम्ये यन् अयन् च स्यात् को तस्य षः षो न स्यात्।

अश्वायति उदन्यति अश्मायति वृषायति अश्वयति हविर्यति हयायति। गर्दभो किं धनीयति।

६ ढडोपमानादाचारे क्यः। डाड्ढोपमानात् क्यः स्यादाचारे ऽर्थे।

शिवमिवाचरति शिवीयति विष्णं विष्णाविवाचरति विष्णूयति शिवे।

७ घान्च्व्यकी सलोपश्च वा गलक्लीवहो ढास्तुमं। अदुपमानादाचारे ऽर्थे च्व्यकी स्तः स च वा लोपः गलादेश्च तावपि मं।

अश्व इवाचरति अश्वायते अश्वति। खायते खति खामाय। ५५ त्यागलादाम्। पयायते पयस्यते गलायते गलते।

८ भृशादेरभ्वर्थे वा नसलोपश्च। भृशादेरभ्वर्थे च्व्यकी वा स्तः तस्मिन् नसलोपश्च।

भृशायते भृशति भृशीभवति चेतायते चेत्यायते वेत्यायते।

९ आजस्रोहितादेः पञ्च। आजस्रात् लोहितादेश्च च्व्यर्थे च्व्यकी वा स्तः पञ्च।

पटपटायते पटपटायति पटपटाति पटपटात्स्यात् खोहितायते खोहितायति खोहिताति खोहितोस्यात् धर्म्मायते धर्म्मायति धर्म्माति धर्म्मीस्यात्।

१० अब्दसुखकष्टादेः कृतिवेदपापे क्यः। अब्दादेः कृतौ सुखादेरनुभवे कष्टादेः पापार्थे प्रवृत्तिरित्यस्मिन्नर्थे क्यः स्यात्।

अब्दं करोति अब्दायते वरायते। सुखमनुभवति सुखायते दुःखायते। कष्टं कर्म्म करोति कष्टायते पापायते।

११ वाष्पोष्मफेनधूमादुद्गतौ।

वाष्पायते उष्मायते फेनायते धूमायते।

१२ रोमन्थाच्चर्व्वणे।

रोमन्थायते गौः।

१३ नमस्तपोवरिवःकण्ड्वादिभ्यः क्यः कृतौ।

नमस्करोति नमस्यति तपस्यति वरिवस्यति कण्डूयति कण्डूयते महीयते छिद्रीयते।

१४ लेः कृत्याख्याने ञिः। लेः परो ञिः स्यात् कृतावाख्याने च।

प्रश्नं करोति आचष्टे वा प्रश्नयति ऊढयति श्रौडि ढत् श्रौजढदित्येके। ५४ सुक्मदद्विनामिति। ईम श्मश्रु माचष्टे ईश्रयति। सुश्मन्तमाचष्टे सुश्मयति सश्मिन माचष्टे सश्मयति।

१५ श्वेताश्वाश्वतरगालोडिताङ्करकस्याश्वतरेतकलोपः।

श्वेताश्वमाचष्टे श्वेतयति अश्वयति गालोडयति आङ्करयति।

१६ नाप्सत्यार्थवेदैकाजतः। सत्यादेरेकाचो ऽकारान्तस्य च औ नाप् स्यान्न हत्। सत्या पयति अर्घापयति वेदापयति खापयति। ५६ वाढाग्निकेति साधादयः। साधयति। प्रश्नमाचष्टे आ पयति।

१७ ञिः कत्यादेः। कत्यादेरर्थविशेषे ञिः स्यात्।

कडिं गृह्णाति कडयति अचकडत् हडयति अजह डत् डतयति अचीकडतत् अचडतत्। वर्णयति लचय ति तूस्तानि विनिहन्ति वितूस्तयति। वस्त्रं संच्छादय ति संवस्त्रयति। वर्म्मणा संनह्यति संवर्म्मयति। चूर्णै रवध्वंसते अवचूर्णयति। हस्तिनातिक्रामति अति हस्तयति। वीणया उपगायति उपवीणयति। तूस्नै रवकुण्ठति अवतूस्नयति श्लोकैरुपस्तौति उपश्लोकयति

शेनया अभिमुखं याति अभिषेणयति अभिषिषेण यिषति। रूपं पश्यति रूपयति। सीमान्वनुमार्ष्टि अनुसीमयति। दक्षौ निरस्यति अतिदक्षयति। पुच्छ मुत्क्षिपति उत्पुच्छयते। भाण्डानि संचिनोति संभा ण्डयते। चीवरं संमार्जयति परिदधाति वा सच्चीव रयते भिक्षुः।

१८८ क्विबोर्यथेष्टं द्विः कण्ड्वादयाद्योस्तृ तीयानाद्योः।

पुपुचीषिषति पुतिचीषिषति पुचीषियिषति पुची षियिषति पुपुतिचीषियिषियिषति अग्निचीषियिषति कण्डू यियिषति।

इति क्विबुपादः।

१ चे यं पराङ्गुक्रप्रत्यभ्रतिक्षिपप्रवदपरि मृषव्योपपरिरमोवातूपरमः। इभ्यः यं खात् ने उपरमक्त वा।

पराकरोति अनुकरोति प्रतिक्षिपति प्रवदति परि मृष्यति विरमति आरमति उपरमति परिरमति उपरमते विष्णुः।

२ कम्याचार्यंङ्बुध युध प्रु द्रु स्रु जन न ग्रोऽञ्जि प्राणिघाढाच्च ञैः।

चलयति भोजयति अध्यापयति बोधयति योध यति प्रावयति द्रावयति स्रावयति जनयति नाशय ति त्राययति कृष्णं यशोदा। प्राणिघात् किं ग्रोष यते ग्रामिं। अढात् किं भक्तिं कारयते। अञ्जौ किं रू पयते हरिः।

इति पपादः।

मं।

१ विपराजिपरिव्यवक्रीविविशानुप्रच्छो मं। एभ्यो मं स्यात्परे।

विजयते पराजयते परिक्रीणीते निविशते आमुते आपृच्छते।

२ आदाज्ञोऽस्वप्रसारे।

आदत्ते। स्वप्रसारे तु व्याददाति मुखं सुप्तः।

३ आगमेः कालो।

आगमयते कालं।

४ पर्य्यभ्यवाङः क्रीडः।

परिक्रीडते अनुक्रीडते अवक्रीडते आक्रीडते।

५ समोऽकूजने।

संक्रीडते। कूजने तु संक्रीडति पक्षी।

६ क्रोऽपाद्वर्षाभ्रवासेच्छे चतुष्पादौसुम् च।

अपक्किरते मत्तः कुक्कुटः श्वा वा अन्यत्र मत्तोऽप किरति गजोऽपकिरत्यन्यत्र।

७ अपथाशीर्गत्यनुकारे अपनाथहञः।
कृष्णाय अपते गोपी मोक्षाय नाथते मुनिः पैतृक मनुहरते अश्वः।

८ प्रतिज्ञानिर्णयप्रकाशे संप्रव्यवाच्चस्थः।
नित्यं अध्दमातिष्ठते। त्वयि तिष्ठते विवादः। रामाय तिष्ठते सीता संतिष्ठते प्रतिष्ठते अवतिष्ठते।

९ उदोऽनूर्ध्वे।
मुक्तावुत्तिष्ठते अन्यच आसनादुत्तिष्ठति ग्रामा ऋतमुत्तिष्ठति।

१० मन्त्रेणोपात्।
गायत्र्योपतिष्ठते अर्कं।

११ मैत्राध्वसङ्गाराधे।
सख्यमुपतिष्ठते साधुः गङ्गामुपतिष्ठते पन्थाः पतिमुपतिष्ठते नारी विष्णुमुपतिष्ठते वैष्णवः।

१२ लिप्सायामवा।
भिक्षुर्धार्मिकमुपतिष्ठते उपतिष्ठति वा।

१३ अदात्।
ज्ञानमुपतिष्ठते।

१४ समोगम्यृच्छिप्रच्छिस्वृस्वृविदिभ्यः।

संगच्छते समगत समगंस्त सङ्गंसीष्ट सङ्गंसीष्ट समृ च्छते संपृच्छते संस्मरते संमृणुते संवित्ते संविद्रते संवि द्रते समिमृते संमंस्यते। अढात् किं गङ्गां सङ्गच्छति।

१५ मेर्व्यासोच्चोढे च।

निरस्यते निरस्यति समूहते समूहति।

१६ गेरुदः खोयेऽणौ।

अन्न समुद्गात्।

१७ आत्माङ्गढाढ्ढाञ्छनयमः।

उर आहते पादमाचष्टे आहते आचष्टे।

१८ क्रमः क्रियिः।

आहत आवधिष्ट आहसातां आवधिषातां अन्यथ मनुमाहन्ति परस्मिन आचष्टे।

१९ यमः स्वचने वा तूदाहे।

रामः सीतामुपायत उपायंस्त।

२० व्युत्तपः।

वितपते उत्तपते पापिं वितपते उत्तपते आत्मानङ्ग ढादढाच किं मर्शी वितपत्तर्दः।

२१ तपोढाद्यक्षरे।

तप्यते तपस्वापसः रे किं अतप्त।

२२ स्वजःआङ्घाननीण् च।

स्वज्यते स्वजं भक्तः असर्शि आङ्घात् किं स्वजति स्वजं मालिकः।

२३ निसंव्युपङ्कः।

निङ्कयते संङ्कयते विङ्कयते उपङ्कयते।

२४ खर्ङ्गायामाङः।

ब्रह्मस्वानूरमाङ्कयते।

२५ खचनावक्षेपणसेवासाहसप्रतियत्न कथोपयोगे कृञः।

अपकुरुते श्येनो वर्त्तिकां उपकुरुते विष्णुं प्रकुरुते परदारान् प्रकुरुते एधोदकस्योपस्कुरुते गीताः प्रकुरुते व्रतं प्रकुरुते।

२६ अधेः प्रत्ययौ।

दैत्यानधिकुरुते कृष्णः।

२७ शब्दढाढाद्देः।

स्वरान् विकुरुते वायुर्विकुरुते अन्यच्च चित्तं विकरोति कामः।

२८ ज्ञानार्थोत्क्षेपोपनयभृतिविगणनव्ययेषु नीञः।

आक्षे नयते विष्णुं नयते दण्डमुन्नयते पुत्रमुपनयते भृत्यमुपनयते ऋणं विनयते द्रव्यं विनयते।

२९ घस्थामूर्त्तढात्।

क्रोधं विनयते। घस्थं किं गुरोः क्रोधं विनयति। अमूर्त्तं किं गण्डं विनयति।

३० वृत्त्युत्साहतायनेक्रमः परोपः क्रमः॥

क्षुद्रं क्रमते बुद्धिः धर्माय क्रमते साधुः सतां श्रीः क्रमते पराक्रमते उपक्रमते।

३१ आङोभोद्गमे।

आक्रमते अर्कः। भोद्गमे किं आक्रामति धूमः खं व्याप्नोतीत्यर्थः।

३२ वेःपक्षिः।

साधु विक्रमते वाजी। पक्षिः किं वाजिना विक्रामति।

३३ प्रेपादारम्भे।

भोक्तुं प्रक्रमते उपक्रमते।

३४ वागेः।

क्रमते क्रामति।

३५ निह्नवेऽभः।

व्रतमपजानीते।

३६ अदात्।

सर्पिषोजानीते।

३७ संप्रतेरस्मृतौ॥

संजानीते प्रतिजानीते अस्मृतौ किं पुत्रं संजानाति।

३८ ज्ञेर्दर्शनौषधे।

दर्शयते भवो भक्तान्। अज्ञो यद्दं तद्वेद्घ इति किं दर्शयति ब्रह्मं भक्तान् भक्तिः। स्मृतौ तु स्मारयति भक्तान् हरिः।

३९ ज्ञानयत्नप्रलोभे वदः।

पाणिनिर्वदते चेचे वदते शिष्यमुपवदते।

४० अनोरदात्।

अनुवदते।

४१ विमतिव्यक्तसदोक्त्योः।

विवदन्ते शिष्याः। व्यक्तं किं संप्रवदन्ति खगाः।

४२ तद्योगे वा।

विप्रवदन्ते विप्रवदन्ति वैद्याः।

४३ अवाद्गिरः।

अवगिरते।

४४ समः प्रतिज्ञायां।

व्रतं सङ्गिरते।

४५ उच्चरः सढात्।

धर्ममुच्चरते। सढात् किं धूम उच्चरति।

४६ समस्या।

अग्निना सञ्चरते।

४७ दानः सा चेच्चतुर्थे।

दात्रा संयच्छते कामी। चतुर्थे किं दात्रा संयच्छति भिक्षां भिक्षवे।

४८ उपयमोविवाहे।

रामः सीतामुपायत उपायंस्त।

४९ भुजोऽनवने।

आखीन् भुङ्क्ते अनवने तु पृथ्वीं भुनक्ति राजा।

५० संदृणोः।

अस्तं संदृणुते।

५१ युजिर उद्गयचोऽयज्ञपात्रे।

उद्युङ्क्ते प्रयुङ्क्ते। यज्ञपात्रे तु प्रयुनक्ति स्रुवं।

५२ प्रतारेवञ्चिगर्द्धेः।

वटुं वञ्चयते गर्द्धयते। प्रतारे किं क्षीणोऽर्थं वञ्चयति।

५३ पूजाभिभवे च लापेः।

जटाभिर्लापयते।

श्येनो वर्त्तिकामुल्लापयते पुत्रमुल्लापयते। एषु किं घृतं विलापयति।

५४ मिथ्याकारेरभ्यासे।

पदं मिथा कारयते। मिथ्या किं साधु पदं कारयति अभ्यासे किं सकृत् पदं मिथा कारयति।

५५ व्यतीहारे गतिहिंसाशब्दार्थहसान्यहवहोऽनन्योन्यार्थे।

व्यतिभवते अर्कमिन्दुः व्यतिहरते व्यतिवहते व्यतिजग्निरे व्यतिजग्निध्वं।

५६ क्षोऽस्तेरेति। अक्षेः क्षः स्यात् एकारे परे। व्यतिक्षे गत्यर्थादेस्तु व्यतिसर्पन्ति व्यतिप्लन्ति व्यति जल्पन्ति व्यतिहसन्ति। अन्योन्यार्थे तु परस्परं व्यतिलुनन्ति।

५७ सुदृग्ऽननुज्ञाऽनाप्रतिश्रोः सनः।

सुसूर्षते दिदृक्षते जिज्ञासते शुश्रूषते। अन्यच अनुजिज्ञासति आशुश्रूषति प्रतिशुश्रूषति।

५८ जिज्ञाऽऽप्तपिवधेनृद्दवसदसुचाद्परिमुहायमयसोऽगिज्ञापवदाग्रन्थोत्सायमः फलिनि। जितो ऽयत्तपिवादेरगिज्ञातेरपवदो ऽग्रन्थादिपूर्व्वयमश्च फलवति धेर्मं स्यात्।

यजते पाययते धापयते नर्त्तयते वादयते वासयते दमयते रोचयते आदयते परिमोहयते आयामयते आयासयते जानीते अपवदते उच्छते संयच्छते आयच्छते। ग्रन्थे तु वेदमुच्छति फलिनि किं यजति याजकः।

इति सपादः।

ढभावः।

१ ढभावे मं। धोर्ढे भावे च मं स्यात्।

२ रतनीर्यगिणौ। धो रे परे यक्तनि परे दृण् स्यात् ढे भावे च।

स्तूयते विष्णुः स्तूयेत स्तूयतां अस्तूयत अस्तावि।

३ हनग्रहदृशः सिद्धादेर्मिण् वा। एभ्यः परासां सिडीढीतीथीनां मिण् वा स्यात् ढभावे।

अस्तावि षातां अस्तोषातां हरिहरौ तुष्टुवे स्तावि ता स्तविता स्तोता स्तावि षीष्ट स्तोषीष्ट स्तावि ष्यते स्तो ष्यते अस्तावि ष्यत अस्तोष्यत स्तूयते स्तूयते दृक्ष्यते।

४ नेक्षूतपोऽनुतापे।

अक्षतप्त दीक्षते।

५ यन् ज्ञिणत्क्ष्णुदिरुग्यातः। आदन्तानां यन् स्यात् ज्ञिणति क्षति क्ष्णुदि च।

अदावि अदाविषातां अद्धिषातां हन्यते अवधि अघानि अघानिषातां अवधिषातां अहसातां गृह्यते अग्राहि अग्राहिषातां अग्रहीषातां। दृश्यते

अदर्शि अदर्शिषातां अदृक्षातां ग्रन्थते मोहो मुकुन्देन अग्रमि अग्रामि अग्रमिषातां अग्रामिषातां अग्रमयिषातां अग्रामयिषातां।

६ भावे माद्यं। मद्याद्यं वचनं भावे प्रयुज्यते।

मद्या भूयते अभावि बभूवे बुभूवे भाविता भविता ग्रन्थते मुनिना अग्रमि अकामि अवामि आचामि व्यमि व्यामि अबधि अजागारि जौ तु अजागरि अजागारि।

७ भन्जऽगिलम्भोवेक्षमोर्नलोपः।

अभाजि अभञ्जि अलाभि अलम्भि। गौ तुअलम्भि।

८ ढवद्ढघोऽढे। ढमेव घत्वं प्राप्नं ढधः स च ढवत् स्यात् न तु ढे सति।

तथा च। क्रियमाणन्तु यत् कर्म्म स्वयमेव प्रसिध्यति। सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुः। स्वयमेव भिद्यते काष्ठं अभेदि।

९ कुधिरन्जःग्यन् पे वारे।

कुध्यति कुध्यते रज्यति रज्यते।

१० वेणजदुहः। अजन्ताद्दुहश्च दृण् स्याद्ढघे।

अकारि अक्षत अदोहि अदुग्ध।

११ न तपरुधसढपचदुहः। तपो रुधः स ढाभ्यां पचदुहाभ्यां च दृण् न स्यात् ढत्वे।

अतप्त अरुद्ध अपक्वाः फलं अदुग्ध गौर्दुग्धं अतए वानयोर्ढे ऽपि ढत्वं।

१२ सनअन्थयग्न्थब्रुक्षगृदुहनमभूषार्था द्यक् च जिक्षश्मिमाढात्त्वऽमिण्। सनन्ताद्रिण् यक् च न स्यात् ढत्वे ऽन्यन्तादेस्तु मिण्वर्जं।

चिकीर्षते अचिकीर्षिष्ट अग्रीते अग्रन्थिष्ट ग्रन्थीते अग्रन्थिष्ट ब्रुते अवोचत किरते अकीर्ष्ट गिरते अगीर्ष्ट दुग्धे अदुग्ध नमते अनंस्त तंसते अतंसिष्ट कारयते अचीकरत अकारयिष्ट अकारिष्ट क्षुते अक्षाविष्ट अक्षोष्ट अयते अम्रियत अम्रायिष्ट आहते आधिष्ट आघानिष्ट आहत।

१३ न्यादिभ्यन्ताढगत्यर्था मुख्ये ढे ढत्वमाप्नुयुः गौणे याचादयो ऽन्ये तु यथेष्टं ढिढधुष्विति।

निन्ये विजनमजागरि रजनिमगमि मदमधाचि सभागं। गोपी हावमकार्ष्यत भावज्ञैनामनन्तेन।

इति ढभावपादः।

क्तिः।

१ भवद्भूतभव्ये त्रिप्रः क्याद्याः। क्याद्याः क्र यस्तिस्तिसः क्रमाद्वर्त्तमानातीतभविष्यत्सु कालेषु स्युः। शेते स चित्तशयने मम मीनकूर्मकोलो ऽभ वद्वृहरिवामनजामदग्न्यः। बोऽभूदभूव भरतायज ह्लाण्डुः कल्की सताञ्च भविता प्रहरिष्यतेऽरीन्।

२ कीलेनातीते।

हन्ति स्म रावणं रामः।

३ यावत्पुराभ्यां भव्ये।

यावद्भवति कल्की पुरा ह्यसने कल्की।

४ कदाकर्हिभ्यां वा।

कदा पश्यामि गोविन्दं कर्हि द्रक्ष्यामि शङ्करं।

५ किंभिर्लिप्सायां। उतर उतम त्वम किमो ऽन्यैर्योगे भव्ये क्रि स्याद्वा लिप्सायां कतरः कतमः को वा भिक्षां राखति रातिं वा।

६ लिप्स्यसिद्धौ। लिप्सेवाद्यादिना स्वर्गादेः सिद्धौ सत्यां भव्ये क्री वा स्यात्।

यो भिक्षां ददाति दास्यति वा स स्वर्गं याति यास्यति वा।

७ ग्यर्थाशंसयोः। ग्या अर्थे प्रेष्यादौ आशंसायाञ्च भव्ये क्रीवा स्यात्।

गुरुसेदायाति आयास्यति वा अथ त्वं वेदमधीष्व वयं तर्कमधीमहे।

८ जात्वपिभ्यां सदाक्षेपे।

जातु निन्दसि गोविन्दमपि निन्दसि शङ्करं।

९ कथमा खीच वा।

कथं निन्दसजं निन्देः प्रभुं देवीं निनिन्दिथ।

१० किमिः खीत्यौ।

को निन्दिष्यति लक्ष्मीशं निन्देत् कतर ईश्वरं।

११ अन्यैस्याश्रद्धामर्षे।

न श्रद्धे मर्षये न यत् स गर्हिष्यतेहरिं। शिवं गर्हेत को निन्देत् विष्णुं निन्दिष्यतीश्वरं।

१२ किं किलास्त्यर्थाभ्यान्ती।

त्वं किं किल हृषीकेशं निन्दिष्यसि न मंक्षसे। मद्दा दव चासि नाम श्रद्धे नो न मर्षये।

१३ जातुयद्यदायदिभिः खी।
न मर्षये अद्धे नो जातु निन्देत् जनाईनं।

१४ यच्चयत्राभ्यां क्षेपचित्रे च।
यच्च निन्देत् विभुं गर्हे चित्रं अद्धा न मर्षये।

१५ चित्रेत्ययदिना। यदिवर्जितेन शब्देना क्षेपे योगे चित्रे गम्ये सदा तौ स्यात्।
चित्रं हसन्ति नामान्यः कृष्णं वन्देत् यदीश्वरं।

१६ वाढेऽयुताभ्यां खौ।
अपि हन्यादयं प्रभुरत्र दुःखं जनेदजः।

१७ प्रौढ्या सम्भावने। प्रौढिः क्षमार्थे सम्भावनं क्रियासु योग्यताध्यवसायः प्रौढिहेतुकसम्भावनो पाधिके ऽर्थे वर्त्तमानाद्धेः सदा खौ स्यात्।
अपि हिंसाज्जगत्त्राता महापातकपञ्चकं।

१८ अद्धार्थैर्वाऽयदि।
अद्धे ऽजं भजेः प्राणैर्भक्ष्यसे ऽजं वभक्ष्य तं।

१९ भव्येवाकस्तच्छीलोः।
इदं वाचा वेश्मेदीदं नीदं नंक्ष्यति वाक्ष्यति।

२० कामोक्तेऽकच्चिति।

कामं भजेद्भवान् भर्गं कचिदर्च्यते शिवं।

२१ गीचेच्छार्थैः।

इच्छामि सर्वं सेवेत श्रीपतिं देवतां भवान्। कामोक्त इति किं इच्छन् करोषि।

२२ विधिनिमन्त्रणामन्त्रणाध्येषणसंप्रश्नप्रार्थनाप्रेष्यप्राप्तकालादौ।

सदा यागं कुर्यात् इह भुञ्जीत भवान् इह अयीत भवान् पचमध्यापयेत् भवान् किं भो वेदमधीयीय उत तर्कमधीयीय भो भोजनं लभेय प्रेषितस्त्वं मद्गृहं गच्छेः प्राप्तस्ते कालः तपः कुर्याः। एवं गी।

२३ समर्थनाशिषोर्गी।

अग्नयेऽध्यवसावः समर्थना विष्णुमपि श्रोषधाणि।

२४ तुह्योस्तातङ् वाशिषि।

पातु पातादः शिवः पाहि पातादः शिवः।

२५ मुजर्भृशार्थेहि तस्वध्वं। पौनःपुन्येऽपि अन्ये चार्थे सदा काले या हि तस्वध्वं खुः। मुजर्भृशं वा खुनाति खुनाव खविष्यति वा खुनीहि खुनीत खुनीत्य खुनीध्वं।

२६ मास्रेन घीव्यौ। मास्रशब्देन योगे सदा घीव्यौ स्तः।

मास्र भवद्दुःखं मास्र भूत् शोकः।

२७ माटीवा। माद्योगे सदा टी स्याद्वा। मा विरंसीत् सुखं मा विरमतु मा विरंस्यति।

२८ व्याशिषि।

जीव्याच्चिरं सज्जनः।

२९ स्मृर्थैस्त्यदित्वतीते। स्मरणार्थैर्योगेऽतीते काले ती स्यात्। यच्छब्दस्त्वेन प्रयुज्यते ह्यपवादोऽयं।

स्मरस्तेनं नंस्यसीत्रं यत् स्मरस्यानमः शिवं।

३० वानेकस्मार्थे। अनेकस्मार्थे प्रयोक्तरि स्मरणार्थैर्योगेऽतीते ती वा स्यात्।
ध्यायसीदं यदीज्ञानं द्रक्ष्यति स्रोष्यते भवान्।

३१ ध्वर्थासम्भवे थी। धोरर्थस्यानिष्पत्तौ सद्दा थी स्यात्।

ज्ञानञ्चेदभविष्यत् सुखमभविष्यत्।

३२ लियुष्मदस्मदि त्यादि त्रिशः। लौ युष्मदि अस्मदि च त्यस्यार्थे प्रयुज्यमाने त्यादीनि त्रीणि त्रीणि क्रमात् स्युः।

जानाति योऽखिलं यच्च न जानीतः श्रुतिस्मृती। यान्यानि च न जानन्ति स मया सेव्यते शिवः। भासि त्वमेको विश्वेश भाथोऽच्युतशिवौ युवां। भाथ यूयं हरिहरब्रह्माद्याः पाद्मनेकशः।। एको भवामि स भवेऽहमादौ द्वारैरथोभौ स भवाव आवां। वयं भवामो बहवः स पुनैस्त्वन्मायया द्यापि विभो प्रसीद।

इति त्रिपादः।

इति मुग्धबोधव्याकरणे त्याद्यन्ताधिकारः समाप्तः।

ल्यः ।

१ क्ताक्त्वोःकभावे । वक्ष्यमाणल्यः क्तसंज्ञः स्यात् स च धोः परः स्यात् स च के भावे च स्यात् ।

२ सरूपोवाध्यः । समानरूपल्यः क्ता वा बाध्यते न लसरूपः ।

३ तव्यानीययाढभावे । धोरेते स्युः ढभावे । चेतव्यं चयनीयं चेयं पुष्यं भवितव्यं भवनीयं भव्यं त्वया ।

४ नोऽचोऽन्तरदुर्गेः प्राग्वणोऽख्याभाभूपूञ्कमगमण्यायवेपानिजादीदितोञिदसादीजुङ्स्तु वा । अन्तरो दुर्वर्जगेश्च परस्य णवि धिहेतौ सति नस्याचः परस्य णः स्यात् न तु ख्यादेः दृजादिवर्जेदितश्च ण्यन्ताङ्सादीजुङ्स्तु वा ।

अन्तर्ण्याणीयं प्रयाणीयं । प्रयापणीयं प्रयापनीयं प्रकोपणीयं प्रकोपनीयं । ख्यादेस्तु प्रख्यापनीयं प्रभापनीयं प्रभवनीयं प्रपवनीयं प्रकमनीयं प्रगमनीयं प्रण्यायनीयं प्रवेपनीयं प्रकम्पनीयं । दृजादेस्तु प्रेङ्खणीयं ।

५ खनाट्टेरेये । खन आदन्तस्य च टेरेः स्यात् ये परे ।

खेयं देयं ।

६ ण्यणोरावश्यके। उवर्णान्नादवश्यभावे ऽर्थे ण्यण् स्यात् ढभावे।

विप्रेण शुचिना भाव्यं।

७ हसहव्यासोः। हसन्नादवर्णान्नात् यौतेरा सुनोतेश्च ण्यण् स्यात् ढभावे।

वाह्यं घात्यं जन्यं वध्यं कार्य्यं याव्यं आसाव्यं।

८ चजोः कगौ घित्यऽसेमक्तयज्ञाङ्गयज गत्यर्थवच्चां। घिति परे चजोः कगौ स्तो न तु सेम्क्तादेः।

पाक्यं रोग्यं गतौ तु वच्यं अन्यच वक्ष्यं काष्ठं।

९ नावश्यके त्यजयजप्रवचाञ्च ण्यणि।

आवश्यके ऽर्थे एषां चजोः कगौ न स्तो ण्यणि।

अवश्यपाच्यं त्याज्यः याज्यः प्रवाच्यं।

१० भुजवचनिप्रयुजोऽन्नाशब्दशके। भुजो भक्ष्ये ऽर्थे वचोऽशब्देऽर्थे निप्रपूर्व्वस्य युजः शक्येऽर्थे चजोः कगौ न स्तो ण्यणि।

भोज्यं वाच्यं नियोज्यः प्रयोज्यः। एषु किं भोग्या भूः वाक्यं पदसमुदायः नियोक्तुमर्हति नियोग्यः प्रभुः।

११ पाय्यधाय्यप्रणाय्यानाय्यकुण्डपाय्यस्
त्राय्यराजसूयसान्नाय्यनिकाय्य परिचाय्योप
चाय्य चित्याग्नि चित्या समुच्चामावास्यामाव
स्यायाज्याः। एते यण्ण्या निपात्यन्ते।

पाय्यं मानं दधात्यग्निमिति धाय्या सामधेनी धाय्या
ऋत्विजः प्रणाय्यो असमतः प्रियो वा। आनाय्यो
दक्षिणाग्निः कुण्डैः पीयते अत्र सोम इति कुण्ड
पाय्यः क्रतुः सत्राय्यः क्रतुः राज्ञा सूयते राज
सूयः क्रतुः सान्नाय्यं हविः निकाय्यो निवासः परिचा
य्योऽग्निः उपचाय्योऽग्निः चित्योऽग्निः अग्नेश्चयनमिति
अग्निचित्या समुच्चोऽग्निः समाश्च इत्यर्थः अमा सह
वसतोऽस्यां चन्द्रार्काविति अमावास्या अमावस्या यजन्ति
अनया इति याज्या निपातो ऽर्थविशेषे।

१२ पुष्करसदनकचतयतग्रसोऽचमवप
रपलपत्रपदभोयोभजजपयजानमस्तु वा।
यवर्गान्तात् अकादेश चमादिवर्जात् यः स्यात् ढभा
वेभजादेस्तु वा।

रम्यं अकं सद्मं तकं चत्यं यत्यं अग्रं भव्यं भार्यं
जप्यं जाप्यं वर्ज्यं वाच्यं आनम्यं आनाम्यं। चमादेस्तु
आचाम्यं वाप्यं राप्यं लाप्यं चाप्यं दाभ्यं अनकारनि
र्देशात्।

१६ ध्यासभीमुण्।

ध्यासभाग गोः।

१४ उपात्स्तुतौ। उपपूर्वस्यसभी मुण् स्यात् चे परे प्रशंसायां।

उपसभ्यः साधुः। स्तुतौ किं उपसभ्यमस्यात् किञ्चित्।

१५ गद्मदयमचरायरोऽगेर्यः। अगिभ्य एभ्यो यः स्यात् ढभावे।

गद्यं मद्यं यम्यं चर्य्यं आचर्य्यं अगेः किं प्रगार्यं अभिचार्यं।

१६ पण्यावद्यवर्य्याचार्य्यवद्याजय्येचय्यक्रयार्य्योपसर्य्याजर्य्यं। एते यान्ता निपात्यन्ते।

पण्यं विक्रेयं अवद्यं अनिष्टं वर्य्या कन्या वर्य्यं श्रेष्ठं आचार्य्यो गुरुः उच्यतेऽनेनेति वद्यं प्रकटं जेतुं अर्हं जय्यं एवं चय्यं क्रय्यं हट्टे प्रसारितं। अर्य्यः स्वामी वैश्यो वा उपसियत इत्युपसर्य्या ऋतुमती न जीर्य्यं त्यजर्य्यं सङ्गतं।

१७ इभृजुषस्विनशाखवुङ्वृञोऽष्टापवृतचषाणिद्यजसमवद्यजःक्यप्। इदंकीकारोऽत्र वृङो वृञश्च ऋपादिवर्जात् क्यप् स्यात् ढभावे।

१८ स्वस्य तन् पिति। स्वान्तस्य तन् स्यात् पिति परे।

आदृत्यः भृत्यः जुष्यः स्तुत्यः दृत्यः स्निग्धः वृधः वृत्यः। ऋपादेस्तु कल्प्यं वर्ण्यं अर्घ्यं पार्श्वस्थर्म्यो वसव स्थर्म्या रज्जुः।

१९ क्रवृषमृजगुहदुहभ्रंससंभृत्यपिग्रहो वा। एभ्यः क्यप् स्यात् वा ढभावे।

कृत्यं कार्य्यं वृष्यं वर्ष्यं मृज्यं मार्ज्यं गुह्यं गोह्यं दुह्यं दोह्यं भ्रंस्यं भ्रंस्यं संभृत्यः संभार्य्यः प्रतिगृह्यं प्रतिग्राह्यं अपिगृह्यं अपिग्राह्यं।

२० गृह्यविनीयविपूयजित्याहर्य्यरुच्याव्यध्यभिद्योद्यपुष्यसिध्यतिध्याज्ययुग्यक्लृप्यकुप्य भार्य्याः। एते क्यवन्ता निपात्यन्ते।

प्रगृह्यं पदं कृष्णगृह्यः कृष्णवर्ण्यः गृह्योऽखेरी ग्राम गृह्याः ग्रामवाह्याः विनीयः कल्कः विपूयो मुञ्जः जित्या हली सरतीति हर्य्यः एवं रुच्यः अव्यय्यः। कूलं भिनत्तीति भिद्यो नदः वार्य्युज्झतीति उद्ध्यो नदः कार्य्यं पुष्णातीति पुष्यः नक्षत्रं कार्य्यं साधयतीति सिध्यः स एव तिथ्योऽपि आज्यं घृतं युग्यं वाहनं क्लृप्ते स्वयं पचत इति क्लृप्यो व्रीहिः कुप्यं सुवर्णरूप्याभ्यामन्यत् भार्य्या वधूः भार्य्या स्त्रिया।

२१ खेर्वदः क्यप्यौ। खेः परादृदः क्यप् वा खौ ढभावे।

ब्रह्मणा उद्यते इति ब्रह्मोद्या ब्रह्मवद्या कथा।

२२ मृषोद्यं नित्यं।

२३ भूहनःक्यप्भावेनतस्य। खेः पराभ्यां क्यप् स्यात् भावे हनो नस्य तस्य।

ब्रह्मत्वं ब्रह्मभूयं ब्रह्महत्या।

२४ धेाः केलिमोढघे। धेाः परः केलिमः स्यात् ढघे।

स्वयमेव पच्यन्ते इति पचेलिमाः तण्डुलाः।

२५ तेख्याःप्रक्याद्यैप्रेष्यानुज्ञाप्राप्तकालेवा। तव्यादयो खसंज्ञाः स्युः ते च प्रक्याद्यर्थेषु वा स्युः।

वोढुं प्रक्यो वोढव्यः वहनीयः वाह्यः स्रोतुमर्हः स्रोतव्यः स्रवनीयः स्रुत्यः। प्रेषितस्त्वं त्वया गन्तव्यं गमनीयं गम्यं। अनुज्ञातस्त्वं त्वया अध्येतव्यं अध्ययनीयं अध्येयं। प्राप्तस्ते कालः त्वया ध्यातव्यं ध्यानीयं ध्येयं।

इति खपादः।

तृणादिः।

२६ तृणकौचे। धोतृणको सो चे।

करोतीति कर्त्ता कारकः दरिद्रायकः।

२७ गलेचोपकपादद्वारकौढे। एतौ निपा त्यौ ढे।

२८ माङीत्क्रमोनेमृतृणः।

अक्रमा उपक्रमा। अन्यच क्रमिता।

२९ अदनन्दिपचादेर्णिननान्धे। यैषां देर्णिन् नन्द्यादेरनः पचादेरण् स्यात् धे।

याची स्याची प्रपायिणौ नन्दनः विचक्षणः जनार्दनः मधुसूदनः लवनः पचः दैवः सेवः सौलुवः रौद्रयः।

३० चिक्लिहचक्रशचराचरचलाचलपतावदघनाघनघाटपटा वा। इते अन्ता निपात्यन्ते वा।

पचे क्लेदः क्रमः चरः चलः पतः वदः हनः पटः।

३१ रात्रेर्मन्वा क्तौ।

रात्रिञ्चरः रात्रिचरः।

२२ क्ष गृ घ्रा प्री जुङः कोदुचोघङ् च। क्रादेरिजुङस्य कः स्यात् तस्मिंश्च दुहो घङ् स्यात्।

किरः गिरः घ्रः प्रियः क्षिपः भूरुहः कामदुघा गौः।

२३ हनजनाङ्गमादेर्डः। हनो जन आदेः स्यात् गमादेश्च डः स्यात् घे।

श्लोकापहः वराहः सरसिजः पङ्कजः अजः गोदः दिपः प्रङ्कः आशुगः नगः गिरिघ्रः वारि चरतीति वार्चो हंसः।

२४ घेट्दृशपाघ्राधाः घ्रः। एभ्यः घ्रः स्यात् घे।

उद्भयः उत्पश्यः उत्पिवः उन्मिघ्रः उद्धमः।

२५ साहिसातिचेतिवेद्येजिधारिपारिक्षिम्यविन्दोऽगेः। अगिभ्य एभ्यः घ्रः स्यात् घे।

साहयः सातयः चेतयः वेद्यः एजयः धारयः पारयः क्षिम्यः विन्दः गोविन्दः।

२६ दुनीभूज्वलाद्यासुसंस्रोर्णौ वा। अगिभ्य एभ्यो णः स्यात् घे वा।

द्रावः द्रवः नायः नयः भावः भवः ज्वालः ज्वलः चालः चलः आस्रावः आस्रवः संस्रावः संस्रवः।

३७ स्वसव्यधिणतनदावहसः। एभ्यो णः स्यात् घे।

श्वासः व्याधः प्रत्यायः अवतानः दायः धायः अवहारः अवसायः।

३८ नृत्खनरञ्जः षकः। एभ्यः षकः स्यात् घे।

नर्त्तकी खनकी रजकी।

३९ गोणनट्थकौ। गायतेरेतौ घे स्तः।

गायनी गाथकः।

४० हायनः। अयं निपात्यते।

भावं जहातीति हायनो वर्षः अम्बु जहातीति हायनो व्रीहिः।

४१ प्रुद्रुस्रुस्रुस्रोऽकः। एभ्योऽकः स्यात् घे।

प्रवकः द्रवकः स्रवकः सरकः स्रवकः।

४२ आशिषि।

जीवतादिति जीवकः।

४३ नाम्न्यन्ये तिक्च। धीराशिषि अन्येऽपि कृतःस्युः तिक् च संज्ञायां।

देवरातः रन्तिः।

४४ सनिसाती वा सन्निश्च।

४५ ढात्षण्। ढात् पराद्वेः षण् स्यात् वे।

कुम्भकारः अघटं घटं करोतीति घटीकारः।

४६ श्वनचरगष्टक्। ढात् परेभ्य एभ्यष्टक् स्यात् वे।

पापघ्नः कुरुचरः सामगः।

४७ श्वकुष्टः। ढात् पराभ्यां आभ्यां टः स्यात् वे।

पुरःसरी यशस्करी विद्या भास्करः क्षपाकरः कर्मंकरी दासी।

४८ शक्तन्स्तम्बादृतिनाथात्फलेरञोम लात्देववातात्कृद्यच्छाप दुः। एभ्यः परेभ्य क्रमादेतेभ्य दुः स्यात् वे।

शक्तत्करिः वत्सः स्तम्बकरिः व्रीहिः-दृतिहरिः श्वा नाथहरिः पशुः फलेग्रहिः मलग्रहिः देवापिः वा तापिः।

४९ कुक्ष्यात्मोदराङ्गुः खिः। एभ्यः परात् भृञः खिः स्यात् वे।

५० खित्यव्याजरुषोमन्स्वोदीकान्तत्वं त्वे काजिचः। व्यवर्जस्याजन्तस्यारुषश्च मन् खश्च स्यात् एकाजिचस्तु दीकान्तत्वं स्यात् खिदन्ते धौ परे।

कुक्षिम्भरिः आत्मम्भरिः उदरम्भरिः।

५१ खश्नेजेः। ङात् परादेजयतेः खश् स्यात् चे।

जनमेजयः।

५२ मन्यात् स्वार्थे।

आत्मानं गां मन्यते गोमन्यः प्रियंमन्यः।

५३ मुञ्जकूलास्यपुष्पाद्वेटः। एभ्यः परा द्वेटः खश् स्यात् चे।

मुञ्जन्धयः कूलन्धयः आस्यन्धयः पुष्पन्धयः मुञ्जन्धयी धेटष्टिलादीप्।

५४ नाडीशुनीस्तनकरमुष्टिपाणिनासिका भ्यश्च। एभ्यः परात् भो धेटश्च खश् स्यात् चे।

नाडिन्धमः नाडिन्धयः।

५५ घटीखारीवातादिध्वरुस्तिलाद्सूर्य्यो ग्राह्मलाटाग्निमतनखमानात्धातुदृङ्गत पपचः। एभ्यः परेभ्यः क्रमादेतेभ्यः खश् स्यात् चे।

घटिन्धमः खारिन्धमः वातन्धमः विधुन्तुदः अरुन्तुदः तिलन्तुदः असूर्य्यम्पश्यः उग्रम्पश्यः ललाटन्तपः मितम्पचः नखम्पचः द्रोणम्पचः।

५६ कूलादुद्भुजुद्वहः। कूलादाभ्यां खश् स्यात् घे।

कूलमुद्भुजा नदी कूलमुद्वहः समुद्रः।

५७ प्रियवशाङ्गयर्त्तिमेघात् सर्व्वकूलाभ्रकरीषाद्दङ्कषः खः। एभ्यः परेभ्यः क्रमादेतेभ्यः खः स्यात् घे।

प्रियम्वदः वशम्वदः भयङ्करः ऋतिङ्करः मेघङ्करः सर्व्वङ्कषः कूलङ्कषः अभ्रङ्कषः करीषङ्कषः।

५८ क्षेमप्रियमद्राद्कुर्व्वा। एभ्यः छन्दसि खो वा स्यात् घे।

क्षेमङ्करः प्रियङ्करः मद्रङ्करः पक्षे क्षेमकारः।

५९ भावधे त्वाग्निताङ्गुवः। आग्नितादङ्गुवः खः स्यात् भावे घे।

आग्नितभावं वर्त्तते। आग्निनो भवत्यनेनेति आग्नितभाव घोदनः।

६० तृभृवृहजिधृतपयमद्दममद्गमलिहसहाजो नाम्नि। एभ्यः खः स्यात् संज्ञायां।

रथेन तरतीति रथम्मरः विश्वम्भरः। पतिम्भरा पुरन्दरः भगन्दरः धनञ्जयः वसुन्धरा शचुन्धयः वाचंयमः अरिन्दमः। दरया माद्यतीति दरम्मदः भुजङ्गमः वहंलिहः सर्म्मसहः वातमजः।

६१ मर्दुंजहोरङ्गमोरगतुरगतुरङ्गमविहगविहङ्गमभुजगभुजङ्गपतगपतङ्गमखगखङ्गमाः। एते खान्ता निपात्यन्ते।

मर्दुंजहातीति मर्दुंजहो मासः उरसा गच्छतीति उरगः उरङ्गमः। विहायसा गच्छतीति विहङ्गमः विहगः।

६२ नग्नपलितप्रियान्धस्थूलसुभगाढ्यात्कुः खनट्धे ख्यर्थे। एभ्यः परात् च्व्यर्थात् खनट् खाद्ये ख्यर्थे।

अनग्नो नग्नः क्रियते ऽनेनेति नग्नङ्करणं। पलित ङ्करणं प्रियङ्करणं। अन्धङ्करणं शोकः स्थूलङ्करणं दधि सुभगङ्करणं रूपं आढ्यङ्करणं वित्तं।

६३ भुवो वे खिष्णुखुकञौ। नग्नादिभ्यः परा च्व्यर्थात् एतौ वे स्तः।

नग्नभविष्णुः नग्नभावुकः।

६४ ढाङ्गजवहसहेविण्। ढात् परेभ्य एभ्यो विण् स्यात्।

सुखभाक् प्रष्ठवाट् तुराषाट्।

६५ अनडुच्छ्वेतवाहादिः। एते विषन्ना निपात्यन्ते।

अनो वहतीति अनड्वान् वृषः श्वेतैरश्वते श्वेतवाः

दृश्रः अवयजतीति अवयाः उक्षाणि भंसतीति उक्षभ्राः यजमानः पुरोडाः हविः पुरोडाश्रः।

६६ क्रमगमखनसनजनोविट्। एभ्यो विट् स्यात् घे।

६७ विड्वनोर्डा। धोरन्तस्य डा स्यात् विटि वनि च।

उदधिक्राः अग्रेगाः विषखाः गोषाः अजाः।

६८ वासुसिस्मनक्कनिषूवनिषूविच्छिषः। धोरेते सुः के भावे।

नीयते अनेनेति नेत्रं दंशनद्धी धोक्षं धोत्रं उरव्यचाः नृचक्षाः रजः चक्षुः सर्पिः सुष्ठु ददातीति सुदामा सुगन्धा।

६९ हवत्रतेर्नेम्। क्तेो हवस्य त्रस्य नेत्र दम् न स्यात्।

सुब्रह्मा सुपीवा प्रातरित्वा सुता भूरिदावा वारिजावा सोमपाः रेट् रोट् क्रुङ् युङ् प्रत्यङ् अक्षधूः मित्रधीः आधीः गीः वऽभृट् घृतसूक् प्रस्थात् क्रव्यात्।

७० क्रादेस्वमनक्कीस्घेस्वः। क्रादयतेः स्वः स्यात् चे मनि क्राविसि घे च।

क्रव्यं क्रस्नं क्रदिः तनूक्छत् उरस्क्रदः।

७१ दृहज्जुहृवाक्प्राट्श्रीद्रूज्वायतस्तू कटप्रूपरिव्राट्द्विद्युज्जगत्दधृक्स्रुष्णिहः।

एते क्विना निपात्यन्ते।

दीर्यतीति दृहत् जुहोत्यनयेति जुहूः वक्त्यनयेति वाक् पृच्छतीति प्राट् श्रयत्येनां श्रीः द्रवतीति द्रूः जवतीति जूः आयतं स्तौति आयतस्तूः कटं प्रवते कटप्रूः परिव्रजति परिव्राट् द्योतते द्विद्युत् गच्छतीति जगत् धृष्णोतीति दधृक् स्रज्यते स्रक् ऊर्द्धं स्निह्यति स्नुष्णिक्।

७२ जिर्घोऽन्यः। अन्यो जिर्घः स्यात्।

मिचं क्षयतीति मिचक्षः।

७३ वेध्याप्यांक्रौ। एषां जिर्घः स्यात् क्रौ।

जः धीः आपीः। ध्याप्योरत एव जिः।

७४ अमुङोश्नस्त्रणौचातिकि। अमन्नसो ङो र्घः स्यात्रणौ श्नसे क्रौ च नतु तिकि।

प्रश्नान्।

७५ श्विावबमवज्वरत्वरोवूङुङाञमे च।

एषाम्व उङा सह ऊट् स्यात् क्रा श्नसि ऽणौ ञमे च।

श्वूः जः मूः जूः तूः।

७६ राच्छ्वोर्लोपः। रात् परयोः क्वयोर्लोपः स्यात् क्वौ झलणौ जमे च।

मूर्च्छा मूः धूर्वी धूः।

७७ आदूटो त्रिः। अवर्णात् परस्योटो त्रिः स्यात्।

जनान् अवतीति जनौः।

७८ यममनतनगमोऽन्तलोपः क्वौ। एषा मन्तस्य लोपः स्यात् क्वौ।

संयत् परिमत् परीतत् संगत्।

७९ श्रिविश्वदेवस्यटेरद्व्यचौक्वौ। श्रेर्विश्वे चो देवस्य च टेरद्व्यचः स्यात् क्विवन्ते ऽञ्चतौ।

सर्व्वानञ्चतीति सर्व्वाङ् विश्वाङ् देवाङ्।

८० अमुद्यङ्अमुमूयङ्अदमुयङ्अदद्व्यङ्। अमुमञ्चतीत्यर्थे एते निपात्यन्ते।

८१ सदसन्तिरःसध्रिसमितिरिः। एषां ऋ मादेते स्युः क्विवन्तेऽञ्चतौ।

सध्र्यङ् सम्यङ् तिर्य्यङ्।

८२ वीरुद्वोधङ्क्वौ

वीरुत्।

८३ तदादिभवत्समानान्योपमानादृशष्टक्सक्किपोढे। तदादेर्भवतः समानादन्यस्मा योपमानात् दृश एते स्युः ढे।

८४ श्रेर्ङा। श्रेर्ङा स्यात् टगाद्यन्ते दृशि। यं दृवदृक्षते तादृक्षः तादृक् भवादृक्षः।

८५ समानेदंकिमदःसेक्षमूः। एषां स्याने स ईं की अमू एते क्रमात् स्युः टगाद्यन्ते दृशि। सदृक्षः ईदृक्षः कीदृक्षः अमूदृक्षः अन्यादृक्षः।

इति तृतीयाध्यायस्य द्वितीयः पादः।

क्तादिः।

८६ क्तक्तवतू भूते ढभावे घे। धोरतीते ऽर्थे ढभावे क्तो घे क्तवतुः स्यात् उकाविती।

सुतस्तया विष्णुः स्यातं मया विष्णुर्विश्वं कृतवान्।

८७ घेर्घोऽढेभावदैन्याक्रोशे तुवा। घे र्घः स्यात् न तु ढे भावदैन्याक्रोशे तु वा तयोः पर योः।

८८ स्वरादेर्द्वितीयस्यातोनतोऽपूर्वस्याधामदोदस्य। स्वादेर्मादेरेकारतो दाम्नाद्रेफात् शीङ्शब्दात् थलयुक्काकारान्तात् परयोस्तयोरस्य नः स्यात् पूर्वस्य च दस्य नः नतु प्रादिभ्यः।

शीनः शीनवान्। अढे किं चितः कामो मया।

८९ वृदुश्रिजूर्णोः क्तितोनेम्। वृञो वृङ् च दम्नादुवर्णान्तात् श्रिङ् ऊर्णोञ् च क्तित दम् न स्यात्।

सूनः सूनवान् दीनः लूनः जीनः रुग्नः भुग्नः प्रहीणः मिन्नः निर्विण्णः ध्यानः म्लानः म्राणः। प्रादेस्तु पूर्त्तः मूर्त्तः ख्यातः ध्यातः भक्तः वृतः श्रितः स्तृतः ऊर्णुतः।

९० दिव्यच्छ्योऽजिगीषाजास्यर्थे न तत्तयोः। दिवेरजिगीषायामच्छतेरजे श्यायतेरस्यर्थे तयोस्तस्य नः स्यात्।

आद्यूनः समकः।

९१ घनस्यर्थे श्योजिः। घने स्यर्थे पार्थे श्योजिः स्यात् तयोः।

शीनं घृतं। जिगीषादौ तु घृतं। उदकमुदकं कूपात्। शीतं जलं। घनस्यर्थे किं संश्यानो वृश्चिकः शीतात् संकुचित इत्यर्थः।

९२ प्रतेः। प्रतिपूर्वस्य श्योजिः स्यात् तयोः।

प्रतिशीनः।

९३ अभ्यवाद्दा। अभ्यवात् परस्य श्योजिः स्याद्दा तयोः।

अभिशीनः अभिश्यानः अवशीनः अवश्यानः।

९४ षिन्नोढ्ये न तोग्रासे। षिन्नः परस्य तयोस्तस्य नः स्यात् ढ्ये ग्रासे वाच्ये।

षिनो ग्रासः स्वयमेव।

९५ पूनोनाग्रे।

पूनो नष्टः। अन्यच्च पूतः।

९६ दुस्नोर्घस्य। आभ्यां तयोरस्य नः स्यात् तयोर्घस्य।

दूनः सूनः।

९७ ग्रसेः कङ् च। ग्रसेस्तयोरस्य नः स्यात् कङ् च।

वृक्णः।

९८ ह्रीग्लाजोन्दनुदविन्दोवा। एभ्यस्तयोरस्य नः स्यात् वा।

ह्रीणः ह्रीतः ग्लाणः ग्लातः जीर्णः जीर्तः उन्नः उत्तः नुन्नः नुत्तः विन्नः वित्तः।

९९ वैशुष्यचोमकवः। एभ्यस्तयोरस्य म क व एते क्रमात् स्युः।

श्यामः शुष्कः पक्वः।

१०० प्रस्योम वा जिस्य। प्रस्यस्तयोरस्य मः स्यात् वा जिस्य।

प्रस्तीमः प्रस्तीतः। प्रात् किं संस्नानः।

१०१ निर्व्वाणभिन्नर्णवित्तफुल्लोत्फुल्लसंफुल्लप्रफुल्लक्षीवक्षुण्णपरिक्षीणोल्लाघाः। एते क्तान्ता निपात्यन्ते।

निर्व्वाणः शान्तः निर्व्वाणं मुक्तिः भिन्नं खण्डं ऋणं

विन्नोत्थं वित्तं धनं वित्तः प्रतीतः फुल्लो विकसितः उत्फुल्लः संफुल्लः प्रफुल्लश्च चीवो मत्तः क्षमखनुः परिक्षमश्च उन्नाघो नीरुजः।

१०२ क्षुधवसघूजार्थाच्चागार्ध्यार्थक्षुभःक्त क्षेम्। एभ्यः परयोस्तयोः क्तक्षेम् स्यात्।

क्षुधितः उषितः अशितः क्षुभितः। गतौ तु अक्षः। गार्ध्ये तु क्षुब्धः।

१०३ पूक्लिश्यवमजपव्याश्वसस्तयोर्वा। एभ्य स्तयोरिम् स्यात् वा।

१०४ पूशीधृषमिदक्षिदक्षिखिदक्षमार्थमृषां सेमोर्णुः। एषां णुः स्यात् तयोः सेमोः।

पवितः पूतः क्लिमितः क्लिष्टः, वमितः वान्तः जपितः जप्तः विश्वसितः विश्वस्तः आश्वसितः आश्वस्तः अधितं धर्षितं मेदितं छेदितं खेदितं मर्षितं। क्षमार्थः किं अपमृषितं वाक्यं।

१०५ भावादिढेषोदुङोऽव्रतः। विहितात्प उदुङो भावादिढयोर्वा स्यात् तयोः सेमोः।

द्योतितं द्युतितं तेन। अनपस्तु द्युधितं।

१०६ लोपोऽभेः। अभेर्लोपः स्यात् तयोः सेमोः।

भावितः भावितवान्।

१०७ नेमडीश्वीदिदेमोऽपत्यनेकाचनिष्कुषः। डीङः श्वयतेरीकारेतो विकल्पितेमश्च पत्यादिवर्जात्तयोरिम् न स्यात्।

डीनः ग्लूनः दीप्तः गूढः रूतः ततः। पत्यादेस्तु पतितः दरिद्रितः निष्कुषितः।

१०८ आदितः। आकारेतस्तयोरिम् न स्यात्।

मिन्नः।

१०९ भावादिढे घा।

मिन्नं मेदितं। तेन। प्रमिन्नः प्रमेदितः सः।

११० अकोर्दे।

अकितोऽर्थितुं शिवस्तेन अक्तः।

१११ क्षुब्धस्वाढस्वान्तध्वान्तफाण्टकष्टघुष्टलग्नश्लिष्टविरिब्धधृष्टविस्रस्तपरिवृढदृढभृतवृत्ताभ्यर्णाः। एते क्तान्ता निपात्यन्ते।

क्षुब्धो मन्थः बाढं भृशं स्वान्तं मनः ध्वान्तं तमः फाण्टं कषायभेदः कष्टं दुःखं घुष्टं शब्दितं लग्नं सक्तं श्लिष्टं अश्लिष्टं विरिब्धः सरः धृष्टः प्रगल्भः विस्रस्तः परिवृढः प्रभुः दृढो बली भृतं पक्वं वृत्तो गुणः अभ्यर्णं समीपं।

११२ नेमसन्निव्यईः। संनिन्निपूर्वात् अईते स्तयोरिम् न स्यात्।

समर्णः न्यर्णः व्यर्णः।

११३ वा रुषामहषत्वरसंघुषास्वनः। एभ्य स्तयोरिम् न स्यात् वा।

रुष्टः रुषितः आन्तः श्रमितः हृष्टः हर्षितः तूर्णः त्वरितः संघुष्टः संघुषितः आस्वान्तः आस्वनितः।

११४ दान्तशान्तपूर्णदस्तस्पष्टछन्नभग्ना वा। एते क्तान्ता निपात्यन्ते वा।

पक्षे दमितः शमितः पूरितः दासितः स्वासितः छादितः भपितः।

११५ स्वायःस्वी वा।

स्वीतः स्वीतवान् स्वातः स्वातवान्।

११६ प्यायोऽगेःपस्वाङ्गेतु वा। अगेः प्यायः पी स्यात् स्वाङ्गादन्यच्च तु वा तयोः।

पीनं मुखं प्यानः पीनः खेदः।

११७ आङोऽन्धुधसोः। आङः परस्य प्यायः पी स्यात् तयोः अन्धूधसोः।

आपेनोऽनुः आपीनः उधः।

११८ क्तादेः खः क्तौ च। क्तादेः खः स्यात् क्तौ च।

प्रफुल्लः।

११९ दोषोमास्यां ङिक्त्यणौ। एषां ङिः स्यात् दणौ तकारे परे।

दितः खितः क्षितः क्षितः।

१२० क्षाशोर्व्वा।

क्षितः क्षातः क्षितः क्षातः।

१२१ शोव्रते नित्यं।

संक्षितं व्रतं।

१२२ धात्वोर्हिः। धात्वो र्हिः स्यात् क्तणौ ते परे।

क्षितः।

१२३ चरफलोरुः। अनयोरकार उः स्यात् क्तणौ ते।

प्रफुल्लः।

१२४ दृहोऽभः। दार्ढ्यकर्त्तृ भावर्गश्च दृत् स्यादेौ ते।

दृत्तः। अधः किंधीतः।

१२५ व्यचस्तावा। गेरचः परस्याधो दार्ढ्यकर्त्तृ वा तः स्यादेौ ते।

प्रत्तः प्रदत्तः।

१२६ घोदाने गीचः।

गीत्तं। दृचः किं प्रत्तं।

१२७ जग्धोऽदोयपि च। अदो जग्धः स्यादेौ ते यपि च।

जग्धं।

१२८ घेर्णादिडे क्तः। आदिडे विहितः क्तो घे स्यात् डभावश्च।

प्रज्ञतः कटं यः प्रज्ञतः कटेन। घेर्ण इति प्रचीयः यः प्रचीयं प्रचितं तेन। चीयः चितो ऽयं तपस्वी चीया युः चितायुः।

१२९ गत्यर्थाडगीस्थासवसजनजृम्भिष क्तः। एभ्यो घे क्तः स्यात् डभावश्च।

गङ्गां गतः डगं प्राप्तः श्रयितः श्रेयसमधिश्रयितो विष्णुः श्रेयुष्कमधिष्ठितः शिवमुपासितः हरिदिनमुपो

विनः राजमनुजातोऽयतः विषमनुजीर्णो ऽनमः अक्षीमाक्षिष्टो मुकुन्दः गरुडमधिरूढो गोविन्दः।

१२० श्रोव्यगत्यऽदनार्थाङुच। निद्रा र्थात् गत्यर्थात् भोजनार्थाच्च ङो डे स्यात् ढभावे चे च।

मुकुन्दस्यासितमिदमिदं यातं रमापतेः। भुक्तमे तदनमस्येत्यूचुर्गोपा दिहढवः।

१२१ आर्धेच्छार्थशीच्छीवादेः सति। एभ्यो वर्त्तमाने क्तः स्यात् तेषु।

विदितः पूजितः वाञ्छितः दृष्टः शीलितः त्रिषोऽनु वर्त्तते।

१२२ ठीपमवत् क्वसुकानौ। धोरेतौ क्रमात् स्तः पमवत् स्तः।

वर्षवान् अजागर्म्वान् अजागृवान् दुद्रुवान् दिदिवान् विविष्वान् विविच्वान्।

१२३ वसोर्भसेवाज्झिषातदम्। वस एकादेशो ऽत्तेरिव आदन्नाच्च वसोरिम् स्यात्तान्यतः।

अधिवान् आदिवान् आरिवान् ईयिवान् ददिवान्।

१२४ इनगसडशविशविन्दो वा। एभ्यो वेरिम् स्यादा।

अग्निवान् अघन्वान् अग्मिवान् अगन्वान् दृहग्निवान् दृहन्वान् विविग्निवान् विविश्वान् विविद्वान् विविदान्।

१२५ दाश्वान्साह्वान्मीढ्वान्। एते वस्वांसौ निपात्यन्ते।

चक्राणः जजागराणः अजायाणः अनूचानः।

१२६ कीपमवत् शतृशानौ। धेरेतौ क्रमात् क्याः पमवत् स्तः।

पचन्।

१२७ शानेऽतोमन्। अकारस्य मन् स्यात् शाने।

पचमानः।

१२८ यासोऽस्य। आसः परस्यास्य यासस्य आ ई स्यात्।

आसीना।

१३९ वेत्तेः शतुः क्वसुर्वा। विदः परस्य शतुः क्वसुः स्यादा।

विदान् विदन्।

१४० शक्तिवयक्तात्क्रीड्ये शतुः शानः।

अचुं निम्नानः कवचं विभ्राणः भोगं भुञ्जानः।

१४१ तीपमवत् स्यतस्यमानौ। धोरेतौ क्रमात् स्याः पमवत् सः।

करिष्यन् करिष्यमाणः।

इति आदिपादः।

१४२ जिश्रीञ्भूसुधरुचरुचरवृधवृतप्रजनोपचपार्तृङ्निराक्रुन्मदपतपचदक्षुर्वे। एभ्य ष्णुः स्यात् चे।

कारविष्णुः श्रायिष्णुः भविष्णुः सहिष्णुः रोचिष्णुः चरिष्णुः वर्द्धिष्णुः वर्त्तिष्णुः प्रजनिष्णुः अपचयिष्णुः अलंकरिष्णुः निराकरिष्णुः उन्मदिष्णुः उत्पतिष्णुः उत्पचिष्णुः।

१४३ ष्णुक् भूजेः। आभ्यां ष्णुक् स्यात् चे।

भूष्णुः जिष्णुः।

१४४ ष्ट्याक्ष्वाक्ष्वाञ्यिपचपरिभजः क्नुः। एभ्यः क्नुः स्यात् चे।

ष्ट्याक्नुः श्वाक्नुः स्वाक्नुः चेक्नुः पचक्नुः परिभाक्नुः।

१४५ ज्यिपचसगृधधृषः क्नुः। एभ्यः क्नुः स्यात् चे।

ज्यिक्नुः चक्नुः गृक्नुः धृष्णुः।

१४६ गृस्थाभूकमगमहनखषवृषपतपदो ऽकः। एभ्यो ऽकः स्यात् वे।

गारकः खावुकः भावुकः कामुकः गामुकः घातुकः खाषुकः वर्षुकः पातुकः पादुकः।

१४७ भिक्ष जल्प कुट्ट लुण्ट वृञः षाकः। एभ्यः षाकः स्यात् वे।

भिक्षाकी जल्पाकी कुट्टाकी लुण्टाकी वराकी।

१४८ यतिग्रहिस्तृहिभ्रीङ आलुः। एभ्य आलुः स्यात् वे।

यतयालुः ग्रहयालुः स्तृहयालुः भ्रयालुः।

१४९ भ्रतसहसिधेर्दोरुः। एभ्यो रुः स्यात् वे।

भ्रेषुः सहुः धेरुः धारुः दारुः।

१५० वसवहःक्वरः। एभ्यः क्वरः स्यात् वे।

वक्वरः हक्वरः भक्वरः।

१५१ मिद्भासभन्जोघुरः। एभ्यो घुरः स्यात् वे।

मेदुरः भासुरः भङ्गुरः।

१५२ क्विन्विदिः कुरः। एभ्यः कुरः स्यात् वे।

क्विदुरः भिदुरः विदुरः।

१५३ जागृयङ्नायजजयवदद्दन्द्म्यः ऊकः।

एभ्य ऊकः स्यात् वे।

जागरूकः यायजूकः जंजपूकः वावदूकः दन्द्मूकः।

१५४ यङन्तात्खलघत्सश्चवदः किः। एभ्यः किः स्यात् वे।

पापलिः पापतिः यायदिः वावदिः।

१५५ दिस्याद्रुङ्लोपिनः। आदन्ताद्दवर्णा न्तादुङ्लोपिनश्च किः स्यात् वे तेषाञ्च दित्वं।

ददिः चक्रिः वक्रिः।

१५६ यायायभासकसखेभ्यिभ्रमदीवरः। एभ्यो वरः स्यात् वे।

यायावरः भास्वरः कस्वरः स्रावरः ईश्वरः ऐश्वरः भ्रमद्वरः।

१५७ ह्वरप् ह्वजीनशगमस्तुमश्च। एभ्यः ह्वरप् स्यात् वे मश्च तः।

ह्वलरी ह्विलरी ह्वलरी वम्बरी गलरी।

१५८ हिंसदीपकम्पाजसम्भिङ्क्रमनमोरः। एभ्योरः स्यात् घे।
हिंस्रः दीप्रः कम्रः अजस्रः क्षेरः कम्रः नम्रः।

१५९ सन्भिक्षाशंस-उः। एभ्यः उः स्यात् घे।
रिप्रुः भिक्षुः आशंसुः।

१६० विन्द्विच्छ। एतौ निपात्यौ।
वेत्तीति विन्दुः इच्छतीति इच्छुः।

१६१ खपतृषधृषोऽनज्। एभ्यो ऽनज् स्यात् घे।
खपनक् तृष्णक् धृष्णक्।

१६२ मृवन्द्आरुः। आभ्यामारुः स्यात् घे।
मरारुः वन्दारुः।

१६३ क्रुक्रुकौभियः।
भीरुः भीलुकः।

१६४ स्पृहिगृहिपतिदयिनिद्राशिभ्यः। एभ्य आय्यः स्यात् घे।
स्पृहयाय्यः गर्हयाय्यः पत्याय्यः दयाय्यः जयाय्यः।

१६५ गण्डमण्डिजिजनिभन्दिभ्योऽन्नः।
एभ्योऽन्नः स्यात् घे।

मन्थयमः मन्थयमः मथनः मथयमः मन्थयमः।

१६६ खनिगदिमदिहदिदुषेरिल्लुः। एभ्य इलुः स्यात् चे।

खनयिलुः गदयिलुः मदयिलुः हदयिलुः दूषयिलुः।

१६७ कृगृजागुःक्विः। एभ्यः क्विः स्यात् चे।

कीर्त्विः गीर्त्विः जागृविः।

१६८ स्वयं भं वि सं प्रात्नुवोडुः। एभ्यो डुः स्यात् चे।

स्वयम्भुः भम्भुः विभः सम्भुः प्रभुः।

१६९ स्तृधूखनखचर पूसह वह दृभ्योधे। एभ्यः रुचः स्याद्धे।

स्तविरं धरिरं धविरं खनिरं यविरं धरिरं पनिरं सहिरं वहिरं।

१७० घञखनटोऽघे। धोरेते घुर्णतु चे।

प्राकारः पादः दासः उपाध्यायः प्रासादः समाजः ग्रामः क्षामः वासः आचामः ग्रसः आमः यमः यामः विग्रमः विग्रामः।

१७१ कभावेऽमी।

प्रभयः वधः करः निश्चयः समञ्जः भयः लयः। स्थानं मानं दानं प्रवेपणं वपनं वहनं भवनं दरिद्रार्थं प्रवर्तनं।

१७२ जीवनसीवने वा।

पक्षे वेवनं सेवनं।

१७३ मुण्डभोऽनेकदुःसोर्गोःखलघ्नोः। केवलदुःसुवर्गात् गोः परस्य सभो मुड् स्यात् खलि घञि च।

प्रलम्भः। अन्यत्र दुर्लभः एकेति किं अतिदुर्लभः।

१७४ खदैधावोदश्मिमथप्रमथस्कारस्को सरागकायनिकायाकायाः। इति समज्ञा निपात्यन्ते।

खदोवेग एधः दृप्त्यवोदः अवक्षेदः श्मिमथः श्मिमन्थनं प्रमथः प्रमन्थनं स्कारः स्कीरणं स्कासः स्कीसनं रज्यतेऽनेनेति रागः कायोदेहः निकायो निवासः आकावस्थितिः।

१७५ खनोऽडरेकेकरकाः।

आखः आखरः आखनिकः आखनिकरकः।

१७६ व्याप्तौ भावेणिन्। णेर्भावे णिन् स्या व्याप्तौ सत्यां णिलुगात् स्वार्थे ञ्यः।

शंरावित्वं वर्त्तते।

१७७ व्यतीहारेणनस्त्री। घोर्भावे णन् स्यात् व्यतीहारे अनन्तात् स्वार्थ ण्यः तदन्तस्य स्त्रियां।

व्यावहारी।

१७८ द्वितोऽथुर्भावे। टुकारेतो घोरथुः स्यात् भावे।

वेपथुः।

१७९ क्विप्रत्ययेऽविमक्। टुकारेतक्विप्रत्ययेऽविमक् स्यात् व्यर्थेऽविप्रत्यये।

करणाज्जातं ह्यविमं।

१८० स्वपरक्षयतप्रच्छविच्छ्याचयजो नङ् भावे नंजिः। एभ्यो नङ् स्यात् भावे नञ्जिः। स्वप्नः स्वप्ना यत्नः प्रश्नः विश्नः याज्ञा यज्ञः।

१८१ किर्हेऽन्तर्गेः। अन्तरोगेश्च परात् हा धातोः किः स्याद्भावे।

अन्तर्द्धिः आदिः।

१८२ ढाड्डे। ढात् परात् डे किः स्यात् डे।

प्रतिधिः प्रवोनिधिः।

१८३ स्तिस्त्यमे। भेः किः स्यात् नतु चेत्तदन्तस्य स्त्रियां।

क्षांतिः वृद्धिः स्मृतिः प्रकृतिः।

११८ ह्रादेः खः नौ च। ह्रादिभ्यः भूतेः पुंसि।

१८४ ह्रगृज्याम्लाद्दाख्वादेर्निः। एभ्यः परः स्वार्थे निः स्यात्।

कीर्णिः गीर्णिः ज्यानिः म्लानिः ह्रानिः ग्लूनिः पूर्णिः।

१८५ सातिहेतिजूतियूतिस्तुतिहिनोतियौतिजवतीनां। एते क्त्यन्ता निपात्यन्ते।

१८६ श्रीव्रजयजविद्स्रासमनचरभटाद्येनसमजनिपतनिसृदः क्यप्। एभ्यो भावे क्यप् स्यात्तदन्तश्च स्त्रियां।

श्रय्या व्रज्या दृज्या विद्या सृत्या स्रास्या मन्याचर्य्या भृत्या भट्टाद्या दृत्या समज्या निपत्या निसद्या।

१८७ कुःशस्य। करोतेः शः स्यात् क्यप् च भावे स च स्त्रियां।

क्रिया कृत्या।

१८८ ह्रजागुर्यः। आभ्यां यः स्यात् भावे स च स्त्रियां।

परिचर्य्या जागर्य्या।

१८९ शंस्त्याद्यः। आभ्यामः स्यात् भावे स च स्त्रियां।

प्रशंसा दिदृक्षा भट्टाद्या कण्डूया।

१९० सेमन्तात्सरोः। यस्मात् सो विहितः सेम् स सेमन्तः तस्माद्गुमतो धोरः स्यात् स च स्त्रियां।

ईषा आसरा। सेमन्तात् किं सीतिः रात्रिः। रुम न्तः किं प्रत्तिः।

१९१ तुलेच्छारातारावारात्कारायोधद्वारारेखालखाचूडाः। एते आत्मा निपात्यन्ते।

चोदना चूडा।

१९२ भीषि चिन्ति पूजि कथि कुवि चर्चि स्पृहितोलि दोलि भिदिछिदाद्यात्वर्धदादेर्ङः।

एभ्यो भावे ङः स्यात् स च स्त्रियां।

भीषा चिन्ता पूजा कथा कुवा चर्चा स्पृहा तोला दोला पचा भिदा छिदा गुहा विदा चिया जना पो डा सरा वधा रजा घञ्च अथ सरा।

१९३ आतोऽन्तःअङ्गेः। एभ्यः परादङ् स्यात् ङः स्यात् स च स्त्रियां।

अन्तर्द्धा अङ्का वंशा प्रभा।

१९४ ओषिग्रन्थिग्रन्थिवेत्तिवन्दासोऽनः।

एभ्यो ऽनः स्यात् स च स्त्रियां।

कारका ईषका अल्पका भल्पका वेदका वल्गना आसना।

१९५ प्रश्नाख्यानेषिः। प्रश्ने आख्याने च धोषिः स्यात् स च स्त्रियां।

काङ्क्षारिमकाषीः वधी काङ्क्षारिमकार्षं।

१९६ अल्पोऽभ्याशोभ्ये स्त्री। अल्पः परादेरिः स्यादाशोभ्ये स च स्त्रियां।

अजीवनिरल्पं भूयात् अप्रथाधिः।

१९७ ईषद्दुःसोःखल् भावे ढे। एभ्यः परादेोः खल् स्याद्भावे ढे च।

ईषद्दाखभवं भवता दुस्खभावं भवता ईषत्करः कटस्त्वया दुष्करः सुकरः।

१९८ क्तोऽनोऽदरिद्रः। दरिद्रावर्जाद्दन्तादीषद्दुःसोः परादनः स्याद्भावे ढे च।

ईषत्पानः दुष्पानः सुपानः। अदरिद्रः किं ईषद्दरिद्रः।

१९९ दृशशासयुधधृषमृषो वा। ईषद्दुःसोः परेभ्य एभ्योऽनः स्यात् भावे ढे च वा।

सुदर्शनः सुदर्शः दुःशासनः दुःशासः दुर्योधनः दुर्योधः सुधर्षणः सुधर्षः दैवम्पर्षणः दैवम्पर्षः।

२०० तादर्थ्ये चतुम्। धोस्यतुम् स्यात् तादर्थ्ये।

कृष्णं द्रष्टुं याति।

२०१ क्त्वाच् वा निषेधेऽलंखल्वुना। निषेधार्थयोरलंखल्वोर्योगे धोः क्त्वाच् स्यादा भावे।

अलं कृत्वा अलं दानेन खलु पीत्वा खलु पानेन।

२०२ पूर्व्वकाले। पूर्व्वस्मिन् काले स्थितादेोः क्त्वाच् स्यात्।

विष्णुं नत्वा स्तौति।

२०३ नक्षित्स्कन्दस्यन्दः।

स्कन्त्वा स्यन्त्वा

२०४ क्षेमप्रियमद्रेभ्रगुधमृडवदवसश्रद्धः। धोः परे रमघटितः क्त्वाच् क्षिप् स्यात् तु बुधादेः।

प्रथित्वा। क्षेमः किं कृत्वा। बुधादेः किं बुधित्वा।

२०५ तृषमृषकृषवञ्चलुञ्चृतो वा। एभ्यः क्षेम् क्त्वाच् क्षिप् स्यादा।

तर्षित्वा तृषित्वा कर्षित्वा कृषित्वा वञ्चित्वा वञ्चित्वा लुञ्चित्वा लुञ्चित्वा वर्त्तित्वा वृत्वा पक्षे तृषित्वा इत्यादयः।

२०६ थफान्नुडः। नकारोऽङ्खान्नात् फान्ना च परस्क्त्वाच् किन्न स्यादा।

ग्रन्थित्वा ग्रथित्वा गन्थित्वा गथित्वा गुम्फित्वा गुफित्वा। नुडः किं कोथित्वा रेफित्वा।

२०७ नञ्जोऽनिमः। नञ्जो ञान्नाच्च नुडोऽनिमः परः क्त्वाच् किन्न स्यादा।

नन्द्वा नंद्वा भक्त्वा भंक्त्वा। अनिमः किं अञ्जित्वा। १६ व्युडोऽवोदधादेरिति। द्योतित्वा द्युतित्वा खेदित्वा खिदित्वा रदादेस्तु रदित्वा विदित्वा मुषित्वा। अदः किं देवित्वा दधादेः किं एधित्वा ओषित्वा।

२०८ पूक्लिशुदित दृम्। एभ्यः क्त्वाच दृम् स्यादा।

पवित्वा पूत्वा क्लिशित्वा क्लिश्वा श्रमित्वा श्रान्त्वा।

२०९ क्रमोर्घो वा।

क्रमित्वा क्रान्त्वा।

२१० जॄभ्रस्योर्नजिः। आभ्यां क्त्वाच दृम् स्यात् न तु भ्रस्जेर्जिः।

जरित्वा ज्रस्त्वा।

२११ हाकोर्हिः।

हित्वा।

२१२ व्याङ्नञः क्रो यप् ये। नञ्वर्जात् व्यात् पराद्वेः क्रो यप् स्यात् ये परे।

प्रक्रम्य क्रत्वा क्रीत्वा क्रयाय क्रयाव क्रयाम क्रयध्व उद्य प्रदाय प्रमाय प्रज्ञाय प्रज्ञाव प्रज्ञाम प्रयाय प्रयाव प्रयाम। १ दीङ्ख्यामिति यपि ङा प्रदाय। १ मिन्वोरिति ङा प्रमाय प्रमाव प्रमीय।

२१३ क्त्वोपोकानिमः। अनिमो मत्व क्त्वोपः स्यादा यपि।

प्रणीत्य प्रणय्य। अनिमः किं प्रनम्य।

२१४ धोर्ध्वेरयः। धुपूर्वस्य ध्वेरयः स्यादा यपि विगणय्य। धोः किं संप्रधार्य्य।

२१५ वापः। आपः परस्य ध्वेरयः स्यादा यपि।

आपय्य आप्य।

२१६ वामेच्योर्मिचौ। मेङो मिः च्वेः चिः स्यादा यपि।

अपमित्य अपमाय प्रचीय प्रचित्य।

२१७ न वेज्याव्योजिः। एषां जिर्न स्यात् यपि।

प्रवाय प्रज्याव प्रवाय।

२१८ संपरिव्योवा। आभ्यां वेर्जिर्वा स्यात् यपि।

संवीय संव्याय परिवीय परिव्याय।

२१९ चणम्वाभीक्ष्ण्ये पूर्वकाले। धोः पूर्वकाले चणम्वा स्यात् पौनःपुन्ये।

सृत्वा सृत्वा नमसि सारं सारं नमसि।

क्तोः ये च विहितास्तत्र भूते भविष्यति ते।

क्त्वोः कभाव इत्युक्तेरन्यत्रापि प्रयोगतः। तथाच

कृत्तद्धितसमासानामभिधानं नियामकं। लक्षणं तदभिज्ञानां तदभिज्ञानलक्षणं।

२२० वक्तव्यं ब्राह्मणे। यदिदं लौकिकप्रयोगव्युत्पत्तये लक्षणमुक्तं तदैदिकप्रयोगव्युत्पत्तौ वक्तव्यं नेयं।

क्वचिद्विहितं स्यात् क्वचिद्विधेयं स्यात् क्वचिदुभयं स्यात्। क्वचित्तोऽन्यदपीत्यर्थः।

यथा पूर्वैभिः नद्यैः ब्राह्मणाय इत्यादौ वेदविधेर्ब्राह्मणशब्दोऽत्र मङ्गलार्थः।

इतीण्णादिपादः।

इति कृदन्ताध्यायः।

वोपदेवप्रशंसाश्लोकोऽयं।

गीर्वाणवाणीवदनं मुकुन्दसंकीर्त्तनञ्चे
त्युभयं हि लोके। सुदुर्लभं तच्च न मुग्धबो
धान्न लभ्यतेऽतः पठनीयमेतत्।

विद्वन्नेश्वरच्छात्रोभिषक्केशवनन्दनः।
वोपदेवश्चकारेदं विप्रो वेदपदाख्यदं।
द्यौर्व्वाचस्पतिनेव पन्नगपुरी शेषाहिनेवा
भवत्। येनैकेन विदुष्मती वसुमती मुख्येन
संख्यावतां। सोऽयं व्याकरणार्णवैकतरणि
स्थातुर्य्यचिन्तामणिर्जीयात् कोविदगर्व्वपर्व्व
तपविः श्रीवोपदेवः कविः।

इत्याचार्य्यचक्रचूडामणिश्रीलश्रीवोपदेवगोस्वामि
विरचितं मुग्धबोधं व्याकरणं समाप्तं।

1Ad
2.00

14 DAY USE
RETURN TO DESK FROM WHICH BORROWED

LOAN DEPT.

This book is due on the last date stamped below, or on the date to which renewed.
Renewed books are subject to immediate recall.

17Aug61

RECD LD
AUG 11 1961

APR 6 = 1966 3 5

IN STACKS
MAR 23 '66

Jun 4 82 RCD

LD 21A–50m-12,'60
(B6221s10)476B

General Library
University of California
Berkeley

T. M. THORPE,
Old and Curious Books,
Prints and Autographs,
BOUGHT AND SOLD,
834 Broadway, New York City.

M201504

PK541
V4
1826

THE UNIVERSITY OF CALIFORNIA LIBRARY

AUL R. CARR
Oriental and
guistic Bookseller
WICK, N. Y., U.S.A.